CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क. का. १२

अथ ❀

ष्णाचार्येण सुपरिष्कृता परिवर्द्धिता च

दशदानादारभ्यमृताहात् वार्षिकश्राद्धपर्यन्ता

अन्त्यपद्धतिः

प्रकाशकः तथा प्राप्तिस्थानम्

पं० बालकृष्णाचार्य, यशोदा पुस्तकालय, दुर्गाघाट, वाराणसी-१

मूल्य : भा० रु० [illegible]

ने० रु० [illegible]

क. का. १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९२२४६

वेद.



Nepal Sanskrit University, Balmeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

श्री गणेशाय नमः

अथ

९१

अन्त्यपद्धतिः

प्रकाशक तथा प्राप्तिस्थानम्—

पं० बालकृष्णाचार्य, यशोदापुस्तकालय,

दुर्गाघाट, वाराणसी-१

मूल्य भा० रु० ३.०० ने० रु० ४.४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्री गणेशाय नमः ॥

अथ अन्त्यपद्धतिः

श्रीगणेशाय नमः ॥ अथ दशदानानि मदनरत्ने ॥ जातुकर्ण्यः ॥ उत्क्रान्त्यादीनि दानानि दश दद्यान्मृतस्य तु ॥ गोभूतिलहिरण्याज्यवासो-धान्यगुडानि च ॥ रौप्यंलवणमित्याहुर्दशदानान्यनुक्रमात् ॥ एतानि दश दानानि नराणां मृत्युजन्मनोः ॥ कुर्यादभ्युदयार्थं च प्रेतेऽपि हि परत्र च ॥ इति हेमाद्रिः ॥ तत्रादौ गोदानम् ॥ दानविधिस्तु ॥ ॐ तत्सत्पूर्वसंकल्प-सिद्धिरस्तु अद्येहामुकगोत्रस्यामुकशर्मणो मम सर्वपापक्षयार्थमिमां दशदाना-न्तरगतां गां सोपस्करां रुद्रदैवताकां सुवर्णादिदक्षिणायुताममुकगोत्रायामुकश-र्मणे ब्राह्मणाय सुपूजिताय तुभ्यमहं संप्रददे नममेति ॥प्रार्थना॥ यज्ञसाधन भूता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. Public Domain. Digitized by eGangotri Funding by MoE-IKS

या विश्वस्यान्न प्रदायिनी ॥ विश्वरूपधरो देवः प्रीयतामनया गवा ॥ दान-प्रतिष्ठाङ्कुर्यात् । अद्य कृतैतत् ॥ इति गोदानम् ॥ अथ भूमिदानं मास्ये ॥ निवर्तनमितामूमि देया ॥ दश हस्तेन दण्डेन त्रिंशद्दण्डं निवर्तनमिति स्मरणात् ॥ दानान्यन्यानि सर्वाणि कनकादीनि यानि च ॥ तानि भूमिप्रदानस्य कलां नार्हन्ति षोडशोमिति ॥ अद्येत्यादि षष्टिवर्षसहस्रपरिमित-स्वर्गेशिवपुरनिवासकामः सर्वपापक्षयकामश्चेमां दशदानान्तरगतां भूमिं बहुसस्यप्रदां वराहदैवत्याममुकगोत्रायेत्यादि तुभ्यमहं संप्रददे न ममेति दद्यात् ॥ प्रार्थना । सर्वेषामाश्रया भूमिर्वराहेण समुद्धृता ॥ अनन्तसस्य-फलदा अतः शान्ति प्रयच्छ मे । यस्यां रोहन्ति बीजानि काले चैव महीतले ॥ त्वत्प्रसादाच्चसफला मम सन्तु मनोरथा इति ॥ अद्यकृतैतत् ॥ इतिभूमिदानम् ॥ अथ तिलदानम् ॥ तिलास्तु द्रोणत्रयमिता देया तच्च पंचपणपरिमिता भवति । अद्येत्यादि दशदानान्तरगतानिमान् तिलान्सो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदैवतान्विष्णुदैवतान्वा मम सर्वपापक्षयकामोऽमुकगोत्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे न ममेति। प्राथना। महर्षेर्गोत्रसंभूताः कश्यपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदानेन मम पापं व्यपोहतु॥ अद्यकृतैतत्। इति तिलदानम्॥ अथ हिरण्यदानम्॥ तच्च निष्कत्रयमितं कनिष्ठद्वादशमाषको निष्कः॥ अद्येत्यादि मम समस्तपापक्षयकाम इदं दशदानान्तरगतं हिरण्यं वह्निदैवतं अमुकगात्राय शर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमह संप्रददे न ममेति॥ प्रार्थना॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥ अद्यकृतैनत्॥ इति हिरण्यदानम्॥ अथाज्यदानम्॥ घृतं तु प्रस्थमितं दद्यात् तच्च विंशतिसेटको भवति॥ अद्येत्यादि मम समस्तपापक्षयकाम इदं दशदानान्तरगतमाज्यं मृत्युञ्जयदैवतममुकगात्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं सप्रददे न मम इति॥ प्रार्थना॥ कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितम्॥ देवानामाज्यमाहारमतः शान्तिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रयच्छ मे ॥ अद्यकृतैतत् ॥ इत्याज्यदानम् ॥ अथ वस्त्रदानम् ॥ सूक्ष्मवस्त्रद्वयं बहुमूल्यमष्टहस्तमितं दद्यात् ॥ अद्येत्यादि मम समस्तपापक्षयकाम इमे दशदानान्तरगते वाससी बृहस्पतिदैवतेऽमुकगोत्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे न ममेति प्रार्थना । शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ॥ देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥ अद्य कृतैतत् ॥ इति वस्त्रदानम् ॥ अथ धान्यदानम् ॥ सार्धखारिद्वयव्रीहयो देयाः तच्च सार्धशतद्वयपणपरिमितं पणषट्कं चनि ॥ अद्येत्यादि मम समस्तपापक्षयपूर्वकमैहिकामुष्मिककशिवफलावाप्तिकाम इदं दशदानान्तरगतममुकसंख्याकं धान्यं प्रजापतिदैवतं अमुकगात्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे न ममेति ॥ प्रार्थना । सर्वदेवमयं धान्यं सर्वोत्पत्तिकरंमहत् ॥ प्राणिनां जीवनोपायमतः शान्तिं प्रयच्छ मे ॥ अद्यकृतैतत् ॥ इति धान्यदानम् ॥ अथ गुडदानम् ॥ गुडंपलषष्ठिमितं दद्यात् ॥ अद्येत्यादि मम समस्तपापक्षयपूर्वकं गृहे लक्ष्म्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थैर्यसिद्धिकामः इदं दशदानान्तरगतंगुडं रसवर्यं सोमदैवतं कुबेरदैवतं च सदक्षिणां अमुकगोत्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे न ममेति ॥ प्रार्थना ॥ गुडमिक्षुरसोद्भूतं मंत्राणां प्रणवो यथा ॥ दानेनानेन मे तस्य परा लक्ष्मीः स्थिरा गृहे ॥ अद्यकृतैतत् ॥ इति गुडदानम् ॥ अथ रजतदानम् । पलत्रयमितं रौप्यं दद्यात् । अद्येत्यादि मम समस्तपापक्षयपूर्वकविष्णुप्रीतिकाम इदं दशदानान्तरगतं रौप्यं चन्द्रदैवतं यथानामगोत्रायाऽमुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे न ममेति ॥ प्रार्थना ॥ प्रीतिर्यतः पितृणां च विष्णुशंकरयोःसदा ॥ शिवनेत्रोद्भवं रूप्यमतः शान्तिं प्रयच्छ मे ॥ अद्यकृतैतत्० । इति रजतदानम् ॥ अथ लवणदानम् ॥ लवण मर्घवारिकं दद्यात् ॥ अद्येत्यादि मम समस्तपापक्षयपूर्वकशिव प्रीतिकामः इदं दशदानान्तरगतं लवणं सर्वरसोत्कृष्टं सोमदैवतं समुद्रदैवतञ्चाऽमुकगोत्रायाऽमुकशर्मण सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे न ममेति ॥ प्रार्थना ॥

Nepal Sanskrit University, Balaeoki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मादन्नरसाः सर्वेनोत्कृष्टा लवणं विना ॥ शम्भोः प्रीतिकरं यस्मादतः शान्तिं प्रयच्छ मे ॥ अद्य कृतैतत् इति लवणदानम् ॥ इति दशदानानि ॥ अथ पञ्चधेनुदानानि ॥ तत्रादौ पापापनोदधेनुदानम् ब्राह्मे ॥ दानोपस्करास्तु गोदानोक्ता एव ॥ अद्येत्यादि ममात्मना मनोवाक्कायकर्मजमाजन्मोपार्जित-पापापनोदकामः इमां कृष्णां पापापनोदधेनुं यथाशक्तिसोपस्करां रुद्रदैवत्याम-मुकगोत्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं सम्प्रददे न ममेति ॥ प्रार्थना ॥ आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः ॥ तत्सर्वं नाशमायान्तु पापधेनुप्रदानतः ॥ अद्यकृतैतत् ॥ अथ ऋणापनोदधेनुदानम् ब्राह्मे ॥ अद्ये-त्यादि ममाऽऽजन्मोपार्जितैहिकामुष्मिकसमस्तऋणपातकच्छेदकामः इमांस-मस्तऋणापनोदधेनुं यथाशक्ति सोपस्करां रुददैवत्याममुकगोत्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं सप्रददे न ममेति ॥ प्रार्थना ॥ ऐहिकामुष्मि-कञ्चैव सप्तजन्मार्जितमृणम् ॥ तत्सर्वं नाशमायतु गामेकां ददतो मम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्यकृतैतत् ॥ अथ प्रायश्चित्तधेनुदानम्॥ ब्राह्मे ॥ अद्येत्यादि मया जन्मप्रभृति अद्य पर्यन्तं यावदाचरितसमस्तपातकस्याकृतप्रायश्चित्तस्याऽऽमरणान्तपापापनोदकामः इमां कापिलां धेनुं यथाशक्तिसोपस्करां रुद्रदैवत्यां प्रायश्चित्तत्वेना मुकगोत्रायामुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे न ममेति ॥ प्रार्थना ॥ प्रायश्चित्ते समुत्पन्ने निष्कृतिर्न कृता क्वचित् ॥ तस्य पापस्य शुद्ध्यर्थं धेनुमेतां ददामि ते ॥ अद्यकृतैतदिति ॥ अथ मोक्षधेनुदानम् ॥ अद्येत्यादि मम समस्तपापक्षयपूर्वकसंसारमोक्षप्राप्तिकामः श्रीपापापहमहाविष्णुप्रीतिकामश्च इमां मोक्षधेनुं यथाशक्ति सोपस्करांरुद्रदैवत्याममुकगोत्रायाऽमुकशर्मणे सुपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे न ममेति ॥ प्रार्थना ॥ मोक्षं देहि हृषीकेश ! मोक्षं देहि जनार्दन । मोक्षधेनुप्रदानेन मम मोक्षोऽस्तु वेगतः इति ॥ अद्यकृतैतत् ॥ सुवर्णदक्षिणां दद्यात् ॥ धेन्वभावे तन्निष्क्रियत्वेन द्रव्यं देयम् ॥ इति मोक्षधेनुदानम् ॥ इति दशदानविधिः समाप्तः शुभमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः ॥ सत्यधरतनूजेन रामोपाध्यायसूरिणा ॥ नत्वा विघ्नेश्वरं देवं क्रियते चान्त्यपद्धतिः ॥ आसन्नमरणंपित्रादिकंस्तीर्थादौ नीत्वा दानं कारयत् ॥ अथ तिलपात्रदानम् ॥ कांस्यपात्रे यथाशक्ति तिलान् क्षिप्त्वा हिरण्यं च देयद्रव्याणि संपूज्य कुशतिलजलान्यादाय ॥ ॐ अद्य-त्यादि देशकालौ संकीर्त्य मम जन्मप्रभृतिमरणान्तकृतनानाविधपापनाशनार्थं सहिरण्यं तिलपात्रं विष्णुदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय सुपूजिताय तुभ्यमहं संप्रददे ॥ प्रार्थना ॥ तिलाः पुण्याः पवित्राश्च सर्वकार्यकराः स्मृताः ॥ शुक्ला वा यदि वा कृष्णा ऋषिगोत्रसमुद्भवाः ॥ यानि कानि च पापानि ब्रह्महत्यासमानि च ॥ तिलपात्रविधानेन तानि नश्यन्तु सर्वदा ॥ महर्षेर्गोत्र-संभूताः कश्यपस्य तिला स्मृताः ॥ तस्मात्तेषां प्रदानेन मम पापं व्यपोहतु ॥ इत्युच्चार्य विप्रहस्ते कुशजलं क्षिपेत् । दक्षिणाद्रव्यादिकमादाय ॥ अद्य कृतैतत् सहिरण्यतिलपात्रदानप्रतिष्ठासिद्ध्यर्थं दक्षिणां हिरण्यमग्निदैवतं तन्मूल्यो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पकल्पितं द्रव्यं वा यथानामगोत्रायेति, पित्राद्यशक्तौ पुत्रादि दद्यात् ॥ तत्र मन्त्रः ॥ ममेतं स्थाने अस्य पापं व्यपोहतु इति वदेत् ॥ अथोत्क्रान्तिधेनुदानम् ॥ गोब्राह्मणौ गन्धादिभिरभ्यर्च्य ॥ ॐ अद्येत्याद्यमुकगोत्रस्यामुकशर्मणो मम प्राणोत्क्रमणे प्रतिबन्धकोक्तिनिष्कृत्यनुक्तनिष्कृतिसमस्तपापक्षयद्वारा सुखप्राणोत्क्रमणार्थं यथाशक्त्यलंकृतामिमामुत्क्रान्तिधेनुं रुद्रदैवत्यामसुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ प्रार्थना ॥ असूत्क्रान्तौ प्रवृत्तस्य मुखात्क्रान्तिनिवृत्तये। तुभ्यं संप्रददे नाम्ना गां समुत्क्रान्तिसंज्ञिकाम्॥ इत्युक्त्वा विप्रहस्ते कुशजलं दत्वा ॥ दानप्रतिष्ठां च कुर्यात्। प्रतिग्रहीता स्वस्तीत्युक्त्वा गोपुच्छग्रहणम् कृत्वा ॥ कोदात् इति प्रतिग्रहीता पठेत् । अथ वैतरणीदानम् ॥ आचम्य ॥ ॐ अद्येत्यादि मम यमद्वारस्थितवैतरण्याख्यनद्युत्तरणार्थं गोदानमहं करिष्ये इतिप्रतिज्ञासंकल्पं कृत्वा ॥ ब्राह्मणं गां च गन्धमाल्यादिभिः संपूज्य ॥ धेनुके त्वं प्रतीक्षस्व यमद्वारे महापथे ॥ उत्तितीर्षुरहं देवि वैतरण्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमोऽस्तुते ॥ इति धेनुं प्रार्थ्य ॥ विष्णुरूप द्विजश्रेष्ठ भूदेव द्विजपावन ॥ ततुं वैतरणीमेनां कृष्णां गां प्रददाम्यहम् ॥ इति ब्राह्मणं प्रार्थ्य ॥ ॐ अद्येत्य दि मम वैतरणासन्तरणार्थमिमां गां कृष्णवस्त्ररक्तमाल्याद्यलङ्कृतां रुद्रदेवत्यामसुकगोत्रायामुकशर्मणे ब्राह्मणाय सुपूजिताय तुभ्यमहं सम्प्रददे ॥ प्रार्थना ॥ यमद्वारे महाघोरे घोरा वैतरणो नदो ॥ तां सन्ततुं प्रयच्छामि कृष्णां वैतरणीं तु गाम् ॥ इत्युक्त्वा विप्रहस्ते जलं दत्वा ॥ ॐ अद्येत्यादि वैतरणोगोदान प्रतिष्ठार्थं दक्षिणां हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे सूपूजिताय ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दक्षिणां दद्यात् ॥ ततः उक्त रीत्या शवं श्मशानं नीत्वा यथोक्तसंस्कारं कृत्वा । ततः कर्ता अन्ये च पुत्राः कक्षोपस्थौ वर्जयित्वा लोमनखानि वापयेयुः ॥ कर्तातिरिक्तानां दशमेऽन्हि यथाचारम् ॥ भर्तरि मृते पत्न्या आद्येऽह्नि दशमेऽह्नि वा सर्वान्केशान्समुद्धृत्य अङ्गुलद्वयछेदनं वपनं वा यथाचारम् ॥ ततः स्नानादिकं विधाय कृत्तोरीयः शुचौ देशे कण्टकान्यपास्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथामिलितदारुभिश्चितां कृत्वा चितोपरि कुशास्तरणं विधाय चितायां कृत-पवित्रं शवमुत्तरशिरसमधोमुखं स्त्रियं चोत्तानदेहमुत्तरशिरं संस्थापयेत् ॥ ❀ततः आचम्य कृतापसव्यो दक्षिणाभिमुखो दक्षिणहस्तेऽग्निं वामहस्ते समिधसप्तकं गृहीत्वेमं मन्त्रं पठेत् ॥ कृत्वा सुदुष्करं कर्म जानता वाप्यजानता ॥ मृत्युकालवशं प्राप्तं नरं पञ्चत्वमागतम् ॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ॥ दहेऽहं सर्वगात्राणि दिव्याँल्लोकान्स गन्छतु ॥ इति पठित्वा शीघ्रं प्रदक्षिणं कृत्वा शिरोदेशेऽग्निं दद्यात् ॥ मंत्रश्चायमदृष्टार्थत्वात्स्त्रीदाहेष्यविकृत एव पठनीयः पुंस्त्वाऽऽविचक्षणात् ॥ सव्येन घृतं स्रुवेण गृहीत्वा दक्षिणाभिमुखस्तूष्णीमेकाहुतिञ्जुहुयात् ॥ ततः सप्रदक्षिणमेकैकां समिधं तूष्णीं चितोपरि क्षिपेत् ॥ नग्नान दग्धव्यः ॥ दग्धशेषं किंचित् त्यजेत् ॥ अर्धदग्धे घृताक्तं पञ्च समिधं जुहुयात् ॥

❀ सगोत्रैः संगृहीत्वा तु चितामारोप्यते शवः । अधोमुखो दक्षिणादीक चरणस्तु पुमानिति । उत्तानदेहां नारीं तु सपिण्डैरपि बन्धुभिरिति ॥ ब्रह्मपुराणवचनात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उत्तानदेहां नारीं तु सपिण्डैरपि बन्धुभिरिति ॥ ब्रह्मपुराणवचनात् ॥
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेक मंत्रेण ॥ अस्मात् त्वमधिजातोसि त्वदयं जायतां पुनः ॥ असौस्वर्गाय लोकाय स्वाहा ज्वलतु पावकः ॥ अवशिष्टशरीरभागमग्भसि क्षिपेत् ॥ क्रव्यादाय नमः इति मन्त्रेण ॥ अथ चितापिण्डदानम् ॥ स्नानादिकं कृत्वाऽपसव्यनषट्-पिण्डान् कृत्वा दक्षिणाभिमुखः वामजानुं पातयित्वा कुशतिलजलान्यादाया-द्यामुकगोत्रामुकप्रेतप्रथमपिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम् वएञ्च पिण्डस्यासनं दद्यात् ॥ ततो तिलकुशजलसहितं प्रथमपिण्डमादाय ॥ अद्यामुकगोत्रामुकप्रतमृत्युस्थाने शव एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् १ द्वारस्थाने पान्थनाम्ना २ चत्वरस्थाने खेचरनाम्ना ३ विश्रामस्थाने भूत-नाम्ना ४ काष्ठसंचयनस्थाने प्रेतनाम्ना ५ चितास्थाने साधकनाम्ना ६ दद्यात् ॥ अद्यामुकगोत्रामुकप्रेत इदं प्रथमपिण्डप्रत्यवनेजनं ते मया दीयते तवोपति-ष्ठताम् ॥ एवमेव क्रमेण द्वितीयादिपञ्चपिण्डेषु दद्यात् ॥ अथोदकदानम् ॥ तत्रप्रेतदाहानन्तरं सर्वे शवस्पृष्टा शवानुगमनकर्तारश्च चितामनवलोकयन्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहरहर्नीयमानो गामश्वं पुरुषं पशूम् ॥ वैवस्वतो न तृप्येत सुराया इव दुर्मतिरिति यमगाथांगायन्ता नदीं जलाशयान्तरं वा बालपुरः सराः पंक्तिक्रमेण गत्वा श्यालकमन्यं ब्राह्मणं वा उदकं करिष्याम इत्युदकं प्रार्थयेयुः । यदि शतवर्षादर्वाक् प्रेतस्तदा कुरुध्वमाचैवं पुनरिति प्रतिवचनम् ॥ शतवर्षप्रेते कुरुध्वमिति प्रतिवचनं गृहीत्वा ॥ कृतापसव्यो दक्षिणाभिमुखो एकवस्त्रधरो वामकरस्यानामिकया आपो नः शोशुचानादघमिति दक्षिणतो जलं नीत्वा तूष्णीं निमज्जेयुः ॥ अङ्गं च न निघर्षेयुः ॥ ततो द्विवासस आचम्य कुशोपरि स्थापितपाषाणोपरिकृतापसव्यो दक्षिणाभिमुखः कुशहस्तः कुशतिलजलान्यादाय अद्यामुकगोत्रामुकप्रेतएष सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठतामिति प्रेताय एकैकमञ्जलिं दद्युः ॥ स्त्रीप्रेतायान्तु अद्यामुकगोत्रेऽमुकप्रेते एष सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठतामिति वाक्यम् ॥ इयं जलदानक्रिया सपिण्डैर्विषमदिने पुत्रैश्च प्रत्यहं कार्या ॥ ततो गृहागमन समये आत्मानं

Nepal Sanskrit University, Ramtek Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धूपयित्वा मार्गे कंटकोपरि पाषाणं स्थापयित्वा पाषाणे पादन्यासं कृत्वा देहल्यश्मनि चरणौ दत्वा गृहं प्रवेशयेत् । ततः उपवास दिवसे सायंकाले कर्तृशयनस्थानसमीपे सप्तधान्योपरि जलपूर्णघटं संस्थाप्य तदुपरि तिलतैलेन घृतेन वा दशाहपर्यन्तमहर्निशं दीपं प्रज्वालयेत् ।। अंधकारं महाघोरं रविर्यत्र नभासते ।। तस्य संतरणार्थाय दीपं दद्याद्दशाह्निकमिति वचनात् दक्षिणाभिमुखोऽपसव्यं कृत्वा कुशतिलजलान्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्य यमदुर्गमार्गमहाघोरान्धतमः सन्तरणार्थमद्यादिदशदिनपर्यन्तमहर्निशं सप्तधान्योपरिस्थापितजलपूर्णघटोपरि एष दीपस्ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् ।। द्वितीयदिने कर्तास्नातः एकस्मिन्पाषाणेतिलतोयाञ्जलिं वर्द्धमानं दत्वा श्राद्धदेशमागत्य पाकं सम्पाद्य ।। अथ प्रयोगः ।। दीपं प्रज्वाल्य कर्ता कुशहस्तः सोत्तरीय आचम्य कृतापसव्यः दक्षिणाऽभिमुखः पातितवामजानुर्वेदिकायां दक्षिणाग्रान् कुशानास्तीर्य ।। कुशतिलजलान्यादाय ।। अद्येत्यादि अमुकगोत्रस्यामुक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रेतस्य रौरवनाम नरकोत्तारणाय मूर्धावयवसंभूत्यै प्रथमदिननिमित्तकशिरः पूरकपिण्डदानमहं करिष्ये इति प्रतिज्ञासंकल्पं कृत्वा पुनः कुशतिल-जलान्यादाय अद्यामुकगोत्रामुकप्रेतप्रथमदिनसम्बन्धि प्रथमपिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामित्यास्तृतकुशोपरि पितृतीर्थेनावनेजनं दद्यात् ॥ ततस्तिलघृतमधुयुक्तं पिण्डं कुशतिलजलसहितमादाय ॥ अद्यामुक-गोत्रामुकप्रेतरौरवनामनरकोत्तारणाय प्रथमदिनसम्बन्धि एष शिरःपूरकःप्रथम-पिण्डस्ते मया दीयते तवोपतिष्ठतामित्यवनेजनस्थाने पिण्डं दद्यात् ॥ ततः कुशतिलजलान्यादाय अद्यामुकगोत्रामुकप्रेत इदंपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति पिण्डोपरि प्रत्यवनेजनं दद्यात् । ततः प्रेतमुद्दिश्य तूष्णीमेवोशीरचन्दनोर्णसूत्रभृङ्गिराजपत्रपूगीफलगन्धपुष्पाक्षतधूपदीपनैवेद्यैः पिण्डमभ्यर्च्य कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रामुकप्रेतप्रथमदिनसंबन्धि प्रथमपिण्डे एतानि पिण्डस्थोशीरचन्दनोर्णसूत्रभृङ्गराजपत्रपूगफलगन्धपुष्पा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽक्षतधूपदीपाच्छतादिनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठतामित्युत्सृजेत् ॥ ततः कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रामुकप्रेत एष सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठतामित्येकं तिलतोयाञ्जलिं पिण्डोपरि दद्यात् ॥ ततः सतिलतोयपूर्णपुटपात्रमादाय कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रामुकप्रेत इदं सतिलतोयपूर्णपुटपात्रं ते मया दीयते तवोपतिष्ठतामितितिलतोयपूर्ण-पुटपात्रं पिण्डसमीपे उत्सृजेत् ॥ ततस्त्रिकाष्ठिकास्थितयोर्पुटपात्रयोर्नीरंक्षीर आदाय ॥ अद्यामुकगोत्रामुकप्रेत इमे त्रिकाष्ठिकास्थिते नीरक्षीरयुतपुटपात्रे ते मया दीयेते तवोपतिष्ठेतामित्युत्सृज्य ॥ श्मशानानलदग्धोसि परित्यक्तोसि बान्धवैः ॥ इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिब ॥ इति पठेत् ॥ ततः सतिलसुशीतलजलपूर्णं घटमग्रे कृत्वा ॥ अद्यामुकगोत्रामुकप्रेतैष सतिल-सुशीतलजलोपेतो घटस्ते मया दीयते तवोपतिष्ठतामित्युत्सृज्य ॥ सुशीतलजलो-पेतः सर्वोपस्करसंयुतः ॥ एष घटो मया दत्तः प्रेताय उपतिष्ठतामिति पठेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः सव्येन ॥ अनादिनिधनो देवः शंखचक्रगदाधरः ॥ अक्षय्य पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव इति पठेत् ॥ ततः कुशतिलजलादिसहितां लौहदक्षिणामादाय अद्यामुकगोत्रस्यामुकप्रेतस्य कृतैतच्छिरपूरकप्रथम पिण्डदानप्रतिष्ठार्थंलौहं यमदैवतं पलपरिमितं तन्निष्क्रयं द्रव्यं वा दक्षिणात्वेन दातुमहमुत्सृजे ॥ इति दक्षिणां दद्यात् इत्युत्सृज्यतत्सर्वं जले क्षिपेत् ॥ ततः पिण्डदानानन्तरमाचारप्राप्तं स्नानं कुर्यात् ॥ अनेनैव प्रकारेण दशपिण्डा देयाः ॥ ❀ प्रथमदिनसम्बन्धयवयवपिण्डदानान्तरं दशदिनपर्यन्तंपिप्पलादिवृक्षे जलपूर्णघटमधः छिद्रं कृत्वा शिक्ये धारयेत् ॥ तत्र वाक्यम् ॥ कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य पापशान्त्यर्थमवश्रमविनाशार्थमि-

---

❀ शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा । द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः ॥ गलांसभुजवक्षांसि तृतीयेन यथाक्रमात् ॥ चतुर्थेन तु पिण्डेन नाभिर्लिंगगुदानि च । जानुजङ्घा तथा पादौ पञ्चमेन विधीयते ॥ सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः । दन्तलोमाद्यष्टमेन वीर्यन्तु नवमेन च ॥ दशमेन च पूर्णत्वं तृप्तताक्षुद्विपर्ययः ॥

Nepal Sanskrit University, Research Center, Campus, Kathmandu

च पूर्णत्व तृप्तताक्षुद्वपयः ॥
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दमाकाशाधिकरणकजलमद्यादिदशरात्रं यावत्ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् । ततः सायंकाले गोमयापलिप्ते प्रांगणे त्रिकाष्टिकोपरि पुटकादौ दीपं पानीयं पुष्पं च संस्थाप्य आशौचान्तं प्रत्यहं दद्यात् ॥ अपसव्येन कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रामुकप्रेतप्रथमदिनसम्बन्धिसायंकाले एष दीपस्ते मया दीयते तवोपतिष्ठताम् ॥ अद्यामुकगोत्रामुकप्रेत इदं पानीयं ते मया दीयते तवोपतिष्ठताम् ॥ अद्यामुकगोत्रामुकप्रेत इदं पुष्पं ते मया दीयते तवोपतिष्ठतामित्युत्सृज्य । अनेन पश्य । इद पिब । इदं परिदेहि इति वदेत् । कर्तृभोजनसमये पुटकादौ सघृतमन्नं कृत्वा अपसव्येन हस्ते जलं गृहीत्वा काकबलिं दद्यादनेन मन्त्रेण ॥ काकोसि यमदूतोसि गृहाण बलिमुत्तमम् ॥ यमद्वारे महाघोरे त्वमाप्यायितुमर्हसि ॥ १ ॥ यमाय धर्मराजाय मृत्यवे चान्तकाय च ॥ दक्षिणां दिशमाश्रित्य प्रेतान्नं बलिमाहरेति पठेत् ॥ सव्यं कृत्वा लवणादिविनैव घृतशर्करार्द्रसहितमन्नं स्वयं भुञ्जीत ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमदिनकृत्यम् ॥ एवं प्रथमदिनकृत्यस्थानमागत्य स्नानादिदक्षिणादानान्तं प्रथमदिनवद्द्वितीयादिदिनेष्वपि कुर्यात् ॥ तत्र विशेषः ॥ अद्येत्याद्यमुकगोत्रस्यामुकप्रेतस्य जातिपुष्करनामनरकोत्तारणाय कर्णाक्षिनासिकावयवसंभूत्यै द्वितीयदिननिमित्तकपूरकपिण्डदानमहं करिष्ये ॥ ततः पिण्डमादाय ॥ अद्याऽमुकगोत्रोमुकप्रेतजातिपुष्करनामनरकोत्तारणाय कर्णाक्षिनासिकावयवसंभूत्यै एष द्वितीयपिण्डस्ते मया दीयते तवोपतिष्ठतामिति ॥ ततः पिण्डप्रत्यवनेजनम् ॥ एता सतिलतोयाञ्जलिस्ते मया दीयते तवोपतिष्ठतामिति सतिलतोयाञ्जलिः पिण्डोपरि दद्यात् । एते सतिलतोयपूर्णपुटपात्रे ते मया दीयेते तवोपतिष्ठतामिति द्वेतिलतोयपूर्णपुटपात्रे पिण्डसमीपे दद्यात् ॥ तृतीयदिने ॥ अद्यामुकगोत्रेत्युक्त्वा हाहाकारनामनरकोत्तारणाय गलांसभुजवक्षःपूरकस्तृतीयपिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ एते सतिलतोयाञ्जलयस्ते मया दीयन्ते तवोपतिष्ठन्तामिति त्रीन् सतिलतोयाञ्जलीन् पिण्डोपरि दद्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दीयन्ते तवोपतिष्ठन्तामिति त्रीणि सतिलतोयाञ्जलीन् पिण्डोपरि दद्यात् ॥
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतानि सतिलतोयपूर्णपुटपात्राणि ते मया दीयन्ते तवोपतिष्ठन्तामिति त्रीणि तिलतोयपूर्णपुटपात्राणि पिण्डसमीपे दद्यादिति विशेषः ॥ चतुर्थदिने ॥ तामिस्रनामनरकोत्तारणाय नाभिलिङ्गपुदपूरकश्चतुर्थपिण्डः ॥ चत्वारः सतिलतोयाञ्जलयः ॥ चत्वारि सतिलतोयपूर्णपुटपात्राणि ॥ तिलतोयाञ्जलीनां तिलतोयपात्राणाञ्च तृतीयदिनवच्चतुर्थदिनादौ वाक्यं कुर्यात् । पञ्चमदिने ॥ अन्धतामिस्रनामनरकोत्तारणाय जानुजङ्घापादपूरकः पञ्चमः पिण्डः ॥ पञ्चतिलतोयाञ्जलयः पञ्चतिलतोयपात्राणि ॥ षष्ठदिने ॥ जातिसंस्रवनामनरकोत्तारणायसर्वमर्मपूरक षष्ठः पिण्डः ॥ षट्तिलतोयाञ्जलयः ॥ षट्तिलतोयपात्राणि ॥ सप्तमदिने ॥ अमेध्यकृमिनामनरकोत्तारणाय सर्वनाडिपूरकः सप्तमपिण्डः ॥ सप्ततिलतोयाञ्जलयः ॥ सप्ततिलतोयपात्राणि ॥ अष्टमदिने पुरीषभक्षनामनरकोत्तारणाय दन्तलोमादिपूरक अष्टमपिण्डः ॥ अष्टौतिलतोयाञ्जलयः अष्टौतिलतोयपात्राणि ॥ नवमदिने ॥ स्वमांस भक्षनामनरकोत्तारणाय वीर्यपूरक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवमपिण्डः ॥ नवतिलतोयाञ्जलयः ॥ नव तिलतोयपात्राणि ॥ नवमे वास-सांत्याग इत्युक्तत्वात् ॥ तस्मिन्दिने वासप्रक्षालनं च कार्यम् ॥ कर्तुर्दशमदिने वा ॥ दशमदिने कुम्भीपाकनामनरकोत्तारणाय पूर्णतातृप्तताक्षुद्विपर्ययहेतुको दशमःपिण्डः ॥ दशतिलतोयाञ्जलयः ॥ दशतिलतोयपात्राणि ॥ एवं पञ्चाशत्ति-लतोयाञ्जलयः क्रमात् ॥ तावन्ति तिलतोयपात्राणि संगुक्तानितिलैःसहेति ब्रह्मपुराणवचनात् ॥ दशमेऽहनि पिण्डं समाप्यारण्यंगत्वा कृतश्मश्रुकर्माणः स्पृष्टान्युत्सृज्य तिलकल्कगौरसर्षपैः शिरःस्नात्वा अहतवासराः शुक्लवाससो वा गोहिरण्यादानालभ्य प्रविशेरन् ॥ अस्मिन्दिने ब्राह्मणादीनां पञ्चगव्य प्राशनम् ॥

अथाऽस्थिसंचयनविधिः, ब्रह्मपुराणे ॥ कुर्यात्तृतीयेविप्रस्य चतुर्थेक्षत्रि-यस्य तु । पञ्चमेवैश्यजातेस्तु शूद्रस्यदशमेऽहनि ॥ अस्थिसंचयप्रेतस्य क्रियते देशगौरवात् ॥ द्वितीयेप्यस्थिसंचय इति क्वचित् ॥ विष्णुः ॥ चतुर्थदिवसेऽ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थिसंचयनं कुर्यात् तेषां गंगाम्भसि प्रक्षेप इति । व्यवस्था च सूत्रानुसारेण वा ज्ञातव्या तथा ॥ त्र्यहाशौचे द्वितीयेऽह्नि कर्त्तव्यस्त्वस्थिसंचयः ॥ सद्यः शौचे तत्क्षणन्तुकर्तव्य इति निश्चयः ॥ कर्तव्यन्तु नरैः श्राद्धं देशकालाविरोधतः ॥ श्राद्धमस्थिसंचयनश्राद्धम् ॥ तच्च अस्थिसंचयनात् पूर्वं संचयनानन्तरं वा कुर्यात् ॥ आमश्राद्धे यवचूर्णेन पिण्डः कर्तव्यः अथ प्रयोगः ॥ अस्थि संचय

कर्तास्नानादिकं विधाय श्राद्धभूमिं सर्षपैस्तिलैश्चावकीर्य रक्षादीपं संस्थाप्य श्राद्धे देयानि वस्तुन्यासाद्याऽऽचम्य पूर्वाभिमुख उपविश्य, अपवित्रः पवित्रोवेत्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति श्राद्धायद्रव्याणि कुशतिलजलेन सिञ्चेत् । ततः कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यास्थिसचयनानिमित्तकमेकोद्दिष्टश्राद्धमहंकरिष्ये इति संकल्पं कुर्यात् ॥ ततो देवताभ्यः इति त्रिः पठेत् ॥ ततोऽपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य इदमासनं ते मया दीयते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तवोपतिष्ठतामिति कुशरूपमासनंदाद्यात् ॥ ततः पुटके प्रादेशमात्रं कुशपत्रद्वायात्मकंपवित्रं पवित्रेस्थ इति मंत्रेण दक्षिणाग्रान्धृत्वा ॥ गन्धद्वारामिति मंत्रेण गन्धम् ॥ श्रीश्चतइतिमंत्रेण पुष्पं च क्षिपेत् ॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा पवित्रंपुष्पमन्नपात्रोपरि नमोनारायणयेति मंत्रेण उत्तराग्रं धृत्वा ॥ या दिव्या आपः पयसा इत्यादिनाऽर्घपात्रस्थजलमभिमंत्र्यकुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतैष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलंददुत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रमासनवामपार्श्वे प्रेतायस्थानमसीति उत्तानमेव स्थापयेत् ॥ ततोऽभ्यर्च्य ॥ कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेत एतानि गन्धपुष्पधूपदीपनैवेद्यपूगीफलवासांसि ते मया दीयन्ते तवोपतिष्ठन्तामिति गन्धादिकमुत्सृजेत् ॥ ततः चतुष्कोणंमण्डलं विधाय ॥ श्राद्धीयान्नंमयभागं--आमान्नं घृततिलमधुजलयुतमादाय । इदमन्नं सजलमेतद्भूस्वामपितृभ्यो नम इत्युत्सृजेत् ॥ अथान्नसंकल्पः ॥ सोपस्करतिलघृतमधुजलयुतमन्नमुपनीय मधु

Nepal Sanskrit University. Tripureshwor Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाभिधार्य पात्रालम्भनाऽवगाहनं विना ॥ पृथ्वी ते पात्रंद्यौरपिधानंब्राह्मस्यमुखे अमृते अमृतंजुहोमि स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधानिदधेपदम् ॥ समूढ़मस्यपाछंसुरे इति पठित्वा ॥ अपहताऽअसुरारक्षाछंसि वेदिषद इति तिलान्नोपरि विकीर्य ॥ कुशादीन्यादाय ॥ अद्यामुकगोत्रायामुकप्रेताय इदं सोपस्करमन्नं ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् ॥ ततो मधुव्वाता इत्यादि ऋचां पाठः—मधु मधु मध्विति ॥ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ नमस्तुभ्यं विरूपाक्षनमस्तेऽनेकचक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः इति श्लोकं पठेत् ॥ ततोन्नपात्र समीपे पिण्डदानार्थं मृत्पिण्डिकां विधाय तत्र रेखोल्मुकभ्रमणं विना छिन्नमूलकुशानास्तीर्यकुशजलान्यादाय ॥ अद्यामुकगोत्रामुकप्रेतास्थिसञ्चयनश्राद्धे पिण्डस्थाने इदमवनेजनन्तेमया दीयते तवोपतिष्ठतामिति कुशोपरि अवनेजनं दद्यात् । ततो घृतमधुतिलयुक्तान्नेन पिण्डं निर्माय जलतिलकुशसहितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डमादाय ॥ अद्यामुकगोत्रामुकप्रेतैष पिण्डस्ते मयादीयते तवोपतिष्ठतामिति अबने जनस्थानेपिण्डं दद्यात् ॥ तत आस्तृत कुशमूलेन करं प्राक्ष्य ॥ पिण्डशेषान्नंपिण्डसमीपे विकिरेत् ॥ सव्यंकृत्वाऽऽचम्य अपसव्यंकृत्वा तूष्णीं भास्करमूर्तिं प्रेतं चिन्तयेत् ॥ ततः कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतेदं पिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पिण्डोपरि दद्यात् ॥ ततो नाभिं विस्त्रंस्य । सव्यंकृत्वऽऽचम्य । अपसव्यंकृत्वा ॥ वामहस्तेन सूत्रमादाय ॥ कराभ्यां गृहीत्वा ॥ प्रतैत्तवास इति सूत्रं पिण्डोपरि धृत्वा ॥ गन्धपुष्पादिना पिण्डं सम्पूज्य कुशादीन्यादय ॥ अद्यामुकगोत्रामुकप्रतास्थिसंचयनश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामिति गन्धादिकमुत्सृजेत् ततः शिवा आपःसन्तु इति जलम् ॥ सौमनस्यमस्तु इति पुष्पम् ॥ अक्षतं चारिष्टमस्तु इति तण्डुलान् ॥ अन्नपात्रोपरि क्षिपेत् ॥ ततः कुशादीन्यादाय ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्यामुकगोत्रस्यामुकप्रेतस्यास्थिसञ्चयनश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्वा ॥ सव्यंकृत्वा दक्षिणां दिशं पश्यन् अघोरः प्रेतोस्तु इति पूर्वाग्रां जलधारां दद्यात् ॥ ततोऽपसव्यं कृत्वा सपवित्रान्कुशानास्तीर्य पुटकस्थजलादिना । इदमूर्जन्ते मया दीयते तवोपतिष्ठतामिति सपवित्रकुशापरि दक्षिणाग्रां पयोधारां दद्यात् ॥ ततः पिण्डमाघ्रायोत्थापयेत् ॥ छिन्नमूलकुशानग्नौ दहेत् ॥ अर्घपात्रं संचाल्य ॥ सव्येन कुशादिसहितं दक्षिणाद्रव्यमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यास्थिसंचयनश्राद्धप्रतिष्ठार्थमिदं रजतं चद्रदैवतं तन्निष्क्रयं द्रव्यं वा यथानामगात्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ अपसव्यंकृत्वा दापमाच्छाद्य । हस्तौ पादौ प्रक्षाल्यऽऽचम्येति इदं पठेत् ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषुच ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ इति पठित्वा विष्णुं स्मरेत् ॥ श्राद्धीयवस्तूनि ब्राह्मणाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिपादयेत् जले वा क्षितेत् ॥ स्त्रिया अपि सर्वं पुरुषैकोद्दिष्टवद्भवति परन्तु प्रतिज्ञाऽऽसनदक्षिणादानवाक्येषु ॥ अमुकगोत्राय अमुकप्रेताय इति । अन्न-संकल्पे तु अमुकगोत्रायै अमुकप्रेतायै इति अन्यत्र सर्वत्र अमुकगोत्रायाः मुकप्रेतायाः इति विशेष उह्यः ॥ इत्यस्थिसंचमनश्राद्धविधिः ॥ अथ पाथेयश्राद्ध प्रयोगः ॥ कर्त्ता स्नानंविधायश्राद्धभूमिं सर्षपैः तिलैश्चावकीर्य रक्षादीपं संस्थाप्य श्राद्धे देयानि वस्तून्यासाद्य आचम्य पूर्वाभिमुख उपविश्य अपवित्रः पवित्रोवेति पठित्वा पुण्डरीकाक्षः पुनातु इति श्राद्धीयद्रव्याणि कुशजलैः सिञ्चेत् ॥ ततः कुशतिलजलान्यादाय अद्येत्यादि देशकालौ स्मृत्वा अमुकगो-त्रस्यऽमुकप्रेतस्यमनुष्यलोकात्प्रेतलोकगमनार्थं पाथेयश्राद्धमेकोद्दिष्टविधिनाऽहं करिष्ये इति संकल्पं कुर्यात् ॥ ततो देवताभ्यः इति त्रिः पठेत् ॥ ततोऽपसव्येन-दक्षिणाभिमुखः पातितवामजानुः कुशादिकमादाय अद्याऽमुकगोत्रस्यामुक-प्रेतस्येदमासनं ते यमा दीयते तवोपतिष्ठतामिति कुशरूपमासनमुत्सृजेत् ॥ ततः

Nepal Sanskrit University, Bagmati-Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुटके प्रादेशमात्रं कुशपत्रद्वयात्मकं पवित्रं पवितं पवित्रेस्थ इति मंत्रेण दक्षिणा
ग्रांधृत्वा ।। शन्नो देवीति जलम् ॥ तिलोसीति तिलान् ।। गन्धद्वारामिति
गन्धम् ॥ श्रीश्चतेति पुष्पं क्षिपेत् ततस्तदर्घपात्रं वामहस्ते कृत्वा पवित्रं
सपुष्पमन्नपात्रोपरि नमोनारायणायेति मंत्रेणोत्तराग्रं धृत्वा या दिव्याऽआप पा.वे.प
इति अर्घपात्रस्थलजलमभिमंत्र्य कुशादीन्यादाय अद्यामुकगोत्रामुकप्रेत-
पाथेयश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवित्रोपरि
अर्घजलं ददुत्सृजेत् ।। ततः पवित्रसहितमर्घपात्रमासनस्य वामपार्श्वे
प्रेतायस्थानमसीत्युत्तानमेव स्थापयेत् ।। ततो गन्धादिभिरभ्यर्च्य कुशादिक-
मादाय अद्यामुकगोत्रामुकप्रेत एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यपूगीफलवा-
सोनैवेद्यादिनि ते मया दीयन्ते तवोपतिष्ठन्तामिति गन्धादिकमुत्सृजेत् ॥ ततः
चतुष्कोणं मण्डलं विधाय श्राद्धीयमामान्नाग्रभागं घृततिलजलयुतमादाय ।।
इदमन्नमेतद्भूस्वामिपितृभ्यो नम इत्युत्सृजेत् ॥ ततो व्यञ्जनमधुघृतजलयुत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्नमुपनीय पात्रालम्भनाऽवगाहनं विना ॥ पृथ्वी ते पात्रं द्यौरपिधानं ब्रह्मणस्यमुखे अमृते अमृतंजुहोमि स्वाहा ॥ इदं विष्णुरिति सुरेत्यन्तं पठित्वा अपहता असुरारक्षाꣳसिव्वेदिषदः इति तिलानन्नोपरि क्षिप्त्वा कुशादिकमादाय अद्यामुकगोत्रायामुकप्रेताय पाथेयश्राद्धे इदमामान्नंसोपस्करणं ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् ॥ सव्यन ॥ मधुव्वातादि ऋचं पठित्वा मधु ३ इति च त्रिःपठेत् ॥ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमछिद्रमस्तु भास्करस्य प्रसादतः ॥ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे । नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति श्लोकं च पठेत् ॥ अत्र विकिरनिषेधः ततोऽपसव्येनान्नपात्रसमीपे पिण्डदानार्थं पिण्डिकां विधाय तत्र रेखोल्मुकभ्रमणं विना छिन्नमूलकुशान्नास्तोर्य ॥ कुशादीन्यादाय अद्यामुकगोत्रामुकप्रेतपाथेयश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामित्यास्तृतकुशोपरि अवनेजनं दद्यात् ॥ ततो मधुघृततिलयुक्तान्नेन पिण्डं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्माय जलतिलकुशसहितपिण्डमादाय अद्यामुकगोत्रामुकप्रेतपाथेयश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठतामित्यवनेजनस्थानोपरि पिण्डं दद्यात् ॥ ततः आस्तृतकुशमूलेन करंप्रोक्ष्य पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ॥ सव्यं कृत्वाऽऽचम्य अपसव्यं कृत्वातूष्णीं प्रेतं भास्करमूर्तिं ध्यायेत् ॥ ततः कुशादीन्यादाय अद्यामुकगोत्रामुकप्रेत इदंपिण्डप्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पिण्डोपरि दद्यात् ॥ ततो नीवीं विस्त्रंस्य । सव्यंकृत्वाऽऽचम्य । अपसव्यं कृत्वा । वामहस्तेन सूत्रमादाय कराभ्यां गृहीत्वा प्रतैतत्तेवास इति सूत्रं पिण्डोपरि धृत्वा गन्धपुष्पादिना पिण्डं सम्पूज्य कुशादान्यादाय अद्यामुकगोत्रामुकप्रेतपाथेयश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामिति गन्धादिकमुत्सृजेत् ॥ ततः शिवा आपः सन्तु इति जलम् ॥ सौमनस्यमस्तु इतिपुष्पम् ॥ अक्षतं चारिष्टमस्तु इति तण्डुलान्तदन्नपात्रोपरि निक्षिपेत् ॥ ततः कुशादीन्यादाय अद्यामुकगोत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यामुकप्रेतस्य पाथेयश्राद्धे तत्तैतदन्नपानादिकमुपतिष्ठतामित्यच्चय्योदकं दत्वा। सव्यं कृत्वा। दक्षिणां दिशंपश्यन् अघोरः प्रेतोस्तु इति पूर्वाग्रां जलधारां दत्वा॥ ततोऽपसव्यंकृत्वा सपवित्रकुशोपरि दक्षिणाग्रां पयोधारां दद्यात्॥ ततः पिण्डमाघ्रायोत्थापयेत्॥ छिन्नमूलकुशानग्नौ दहेत्॥ ततोऽर्घपात्रं संचाल्य। सव्येन कुशतिलसहितदक्षिणाद्रव्यमादाय अद्याऽमुकगोत्रस्यामुक-प्रेतस्य मनुष्यलोकात्प्रेतलोकगमनार्थंपाथेयश्राद्धप्रतिष्ठासांगतासिद्ध्यर्थं दक्षिणां रजतं चन्द्रदैवतं तन्निष्क्रयं द्रव्यं ताम्रं सूर्यदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे इति दक्षिणां दद्यात्॥ अपसव्यंकृत्वा दीपमाच्छाद्य॥ सव्येन हस्तौपादौ प्रक्षाल्याऽऽचम्य॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः। इति विष्णुं स्मृत्वा श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् जले वा क्षिपेत्॥

॥ इति पाथेयश्राद्धं सम्पूर्णम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथैकादशाहे कर्तव्यता ॥ तत्र मत्स्यपुराणे । आशौचान्तद्वितीयेह्नि शय्यां दद्याद्विचक्षणः ॥ काञ्चनंपुरुषं तद्वत् फलवस्त्रसमन्वितम् ॥ पूजयेद्द्विजदम्पत्यान् नानाभरणभूषणैः ॥ वृषोत्सर्गं च कुर्वीत धेया च कपिला शुभा ॥ तथा ॥ द्वादशाह्नि यदा कुर्यात्पितुः पुत्रः सपिण्डनम् ॥ एकादशेऽह्नि कुर्वीत प्रेतश्राद्धानि षोडश ॥ याज्ञवल्क्यः ॥ यस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोडश : ॥ पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥ तानि च ॥ मासिकानि दर्शकं च आद्येद्वे ह्यर्द्धमासिकम् ॥ ऊनाब्दमूनषण्मासं प्रेतश्राद्धानि षोडश ॥ आद्यद्वे आद्यमासिकोनमासिके । अर्द्धं त्रैपाक्षिकं । जातूकर्ण्योपि ॥ द्वादशाःप्रतिमास्यानिअद्याषाण्मासिके तथा ॥ त्रैपाक्षिकाब्दिके चेति श्राद्धान्येतानि षोडशः ॥ अत्र द्वादशप्रतिमास्यानीत्यभिधानादाद्यषाण्मासिकाब्दिकशब्दा ऊनमासिकोनषाण्मासिकोनाब्दिकपराः एतेषां नियतःकालः शातातपेनोक्तः ॥ मृतेऽहनि तु कर्तव्यं प्रतिमासन्तु वत्सरम् ॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ अत्र प्रतिमासं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिसंवत्सरंचेत्यभिधानादाद्यमेकादशेऽहनि इत्युक्तत्वादाद्यमासिकमाद्याब्दिकं चैकादशेहन्येव कुर्यात् ॥ अनेनेवाभिप्रायेण गोभिलोऽप्याद्यस्य द्विरावृत्तिमाह ॥ ब्राह्मणं भोजयेदद्ये होतव्यमनलेऽथवा ॥ पुनश्च भोजयेद्विप्रान् द्विरावृत्तिर्भवेदिति ॥ क्षत्रियादिरपि आद्यं श्राद्धमेकादशेन्ह्येव कुर्यात् ॥ तदाह बृद्धवसिष्ठः ॥ एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम् ॥ चतुर्णामपि वर्णानां सूतकन्तु पृथक् पृथक् ॥ लौगाक्षिरपि ॥ आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ॥ कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥ पैठीनसिः ॥ सपिण्डीकरणादर्वाक्कुर्याच्छ्राद्धानि षोडश ॥ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु ॥ सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः ॥ प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्सतान्यपि ॥ शाठ्यायनः ॥ सपिण्डीकरणादर्वाक् अपकृष्य कृत्यान्यपि ॥ पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात् ॥ वृद्धिश्राद्धान्तरं तन्निषेधादित्यर्थं ॥ तथा ॥ नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश ॥ एकेनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तु कार्याणि संविभक्तधनेष्वपि ।। शातातपोऽपि ।। सपिण्डीकरणं यावत्प्रेत श्राद्धानिषोडशः ।। पृथङ्नैव सुताः कुर्युः पृथक्पिण्डाऽपि क्वचित् । तत्र च यथांशं सर्वैर्देयं देयम् ।। सद्यः शौचे तु शंखः ।। सद्यः शौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि ।। स एव दिवसस्तस्यश्राद्धशय्यासनादिषु ।। पिण्डोदकादिष्विति वा पाठः ।। एकाहाशौचे तु दशाहकृत्यं तस्मिन्नेवाऽहनि द्वितीये चैकादशाहः इति ढुंढुपद्धतौ ।। त्र्यहाशौचे तु चतुर्थेऽहनि एकादशाहः । नव श्राद्धमासिकयोर्विघ्ने कण्वः ।। नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत् ।। तत्तदुत्तरसातंत्र्यादनुष्ठेयं प्रचक्षते ।। उत्तरसातंत्र्यं उत्तरेण समानकालत्वं तस्मादित्यर्थः ।। नव श्राद्धमाश्वलायनशाखिनाम् ।। तथा च शिवस्वामिः ।। नव श्राद्धानि पञ्चाहुराश्वलायनशाखिनः ।। आपस्तम्बः ।। षडित्याहुर्विभाषा तैत्तिरीयकाः एकादशाहव्यतिरेकेण पञ्च ।। यतिषु शातातपः ।। एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम् ।। न कुर्यात् पार्वणादन्यद् ब्रह्मीभूताय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिच्चवे ॥ उसना ॥ एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा । अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते ॥ तथा च । आशिषाद्विगुणादर्भाजयाशीः स्वस्तिवाचनम् ॥ पितृशब्दः स्वसम्बन्धः शर्म्मशब्दस्तथैव च ॥ पात्रालम्भोऽवगाहश्च उल्मुकोल्लेखनादिकम् ॥ तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च ॥ प्रदक्षिणाविसर्गश्च सीमान्तगमनं तथा ॥ अष्टादशपदार्थाश्च प्रेतश्राद्धे विवर्जयेत् ॥ प्रेतश्राद्धे न विकिर इति स्मृतिरत्नावल्याम् ॥ तथा च ॥ प्रेतश्राद्धे तु यत्पात्रमर्घ्यार्थं परिकल्पितम् ॥ तस्यैवोत्तानता प्रोक्ता शेषेषु न्युब्जता मता ॥ आश्वलायनः ॥ प्रेतश्राद्धेषु सर्वेषु न स्वधा नाभिरम्यताम् ॥ स्वस्त्यस्तु विसृजेदेवं सकृत्प्रणववर्जितम् ॥ एकोद्दिष्टस्य पिण्डे तु अनुशब्दो न युज्यते ॥ पितृशब्दं न कुर्वीत पितृहा चोपजायते ॥ अनुशब्दः सामगानाम् ॥ पितृशब्देन अत्र पितरः ॥ नमो वः० ऊर्ज्जं इति मन्त्र पाठनिषेध इति सुगतिकृत् ॥ वाराहपुराणे ॥ अस्तं गते तथाऽऽदित्ये गत्वा विप्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवेशनम् ॥ दत्वा तु पाद्यं विधिवन्नमस्कृत्य द्विजोत्तमम् ॥ पादौ प्रक्षाल्य तैलेन प्रेतस्य हितकाम्यया ॥ प्रभातायान्तु शर्वर्यामुदिते च दिवाकरे ॥ कारयित्वा श्मश्रुकर्म नखच्छेदं ततः परम् ॥ स्नापनाभ्यञ्जने च दद्याद्विप्राय विधिपूर्वकम् ॥ इत्युक्तत्वात्पूर्वदिने श्राद्धार्थं द्विजनिमन्त्रणं कर्त्तव्यम् ॥ तत्र कूर्मः ॥ आशौचान्तदिने हविष्यमेकवारं भुक्त्वा रात्रौ विप्रनिवेशनं गत्वा त्रीनेकं ब्राह्मणमुदङ्मुखमुपनिवेश्य कृतापसव्यो दक्षिणाभिमुखः पातितवामजानुः ॥ गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात्पथः ॥ मनसा वायुभूतेन विप्र त्वाहं नियोजये ॥ पूजयिष्यामि भावेनेति प्रेतोद्देशेन पठित्वा ॥ पुष्पचन्दनपूगीफलानि विप्रहस्ते दत्वा ब्राह्मणदक्षिणजानु स्पृष्ट्वा ॥ अद्यास्यां रात्रवमुकगोत्रास्यामुकप्रेतस्य श्व आद्यमासिकश्राद्धकरणाय भवन्तं ब्राह्मणमभिमन्त्रये ॥ आमन्त्रितोऽस्मीति ब्राह्मणेनोक्ते ॥ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥ सर्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवद्भिश्च भवितव्यं स्वस्तये श्राद्धकर्मणि इति ब्राह्मणमुद्दिश्य पठेत् ॥ यद्यविघ्नेयं रजनी याति तदा सर्वमेतत्करिष्यामीति तेनोक्ते विप्रं नमस्कृत्य प्रेतहितमुद्दिश्य तिलतैलेन जानुविप्रपादौ प्रक्षालयेत् । अत्र स्त्रिया अपि गतोसीति अविकृतमेव पठनीयम् ॥ आत्मस्त्वेनोद्दिश्यत्वात् ॥

अथैकादशाहे क्रियाक्रमः ॥ अथ प्रातर्नदीं जलाशयान्तरं वा गत्वा पात्रब्राह्मणस्य श्मश्रुकर्म नखच्छेदनं च कारयित्वा ताम्रपात्रेण स्नानोपकरणं तैलोद्वर्तनं च दत्वा स्वयं च स्नात्वा श्वेतवस्त्रं परिधाय जलाशयसमीपे गृहे वा श्राद्धभूमिंप्रकल्प्य तां संशोध्य गौरमृत्तिकयाऽऽच्छाद्य गोमयेनोपलिप्य पंचगव्येनाभ्युक्ष्य तिलसर्षपाँश्च विकिरेत् ॥ आस्तृतपाकस्थाने तिलान्विकीर्य तत्र सपिण्डनद्वारा नूतनमृन्मयभाण्डेताम्रपात्रादिभिर्वा पाकं कारयितुमारभ्योदङ्मुखाय ब्राह्मणाय शय्यां दद्यात् ॥ तत्र क्रमः ॥ कर्त्ता आचन्तः पूर्वाभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुखः सव्येन । सोपस्करणशय्यायै नमः ॥ ब्राह्मणाय नमः इति देयब्राह्मणं त्रिः सम्पूज्य वारिणा शय्यामभिषिच्य कुशतिलजलान्यादाय ॥ अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रायामुकप्रेतस्य स्वर्गप्राप्तिकाम इमां सोपस्करणशय्यां विष्णुदैवतामामुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥ इत्युक्त्वा दद्यात् ॥ प्रार्थना । यस्मादशून्यं शयनं केशवस्य शिवस्य च । शय्या अस्याऽप्यशून्याऽस्तु तस्माज्जन्मनि जन्मनि ॥ ततो दानप्रतिष्ठा ॥ कुशतिलजलसहितं दक्षिणाद्रव्यमादाय ॥ अद्यकृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणायभूयसीं दक्षिणां तुभ्यमहं सम्प्रददे इति दक्षिणां दद्यात् ॥ प्रतिग्रहीता स्वस्तीत्युक्त्वा शय्यां स्पृशेत् ॥ अथ कांचनपुरुषदानम् ॥ आचम्य ॥ फलवस्त्रसमन्वितकाञ्चनपुरुषाय नमः ॥ ब्राह्मणाय नमः इति देयब्राह्मणं त्रिःसम्पूज्य ॥ कुशादीन्यादायअद्याशौचान्त द्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य स्वर्गप्राप्तिकामः इमं फलवस्त्रसमन्वितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काञ्चनपुरुषं विष्णुदैवतममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । स्वस्तीति प्रतिवचनम् ॥ ततो दक्षिणाद्रव्यादिकमादाय ॥ अद्यकृतैतत्फल-वस्त्रसमन्वितकाञ्चनपुरुषदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायाऽमु-कशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॥ प्रतिग्रही-ता स्वस्तीत्युक्त्वा काञ्चनपुरुषं स्पृशेत् ॥ अथ द्विजदम्पतीपूजनम् ॥ आचम्य ॥ कुशतिलजलान्यादाय ॥ अद्याशौचान्तद्वितीयेह्नि अमुकगोत्रस्याऽमुकप्रेतस्य स्वर्गप्राप्तिकामोद्विजदम्पतीमहं पूजयिष्ये ॥ इति संकल्प्य द्विजदम्पतिं पूजयेत् ॥ तत्र क्रमः ॥ इदमासनं द्विजदम्पतिभ्यां नमः ॥ एषोऽर्घो द्विजदम्पतिभ्यां नमः ॥ इदमनुलेपनं द्विजदम्पतिभ्यां नमः ॥ एवं धूपदीपनैवेद्यपूगीफलसिन्दूर-भूषणवासांसि द्विजदम्पतिभ्यां नमः इति दद्यात् ॥ ततो नमस्कुर्यात् ॥ प्रतिमा पूजनपक्षे पूजयित्वा ब्राह्मणाय दद्यात् ॥

एतच्च द्विजदम्पतिपूजनं प्रधानत्वाद् वृषोत्सर्गकरणेऽपि कर्तव्यः शय्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri Funding, MIDF

एतच्च द्विजदम्पतिपूजनं प्रधानत्वात् वृषोत्सर्गकरणेऽपि कर्तव्यः शय्या-

दानवदिति शय्यादानादिकमन्वारोहणेऽपि कर्त्तव्यम् ॥ तत्रामुकगोत्रायाऽमुक-प्रेताय इति वाक्यं कुर्यात् ॥ अथ वृषोत्सर्गविधिः ॥ पतिपुत्रवती नारी भर्तुरग्रे मृता यदि ॥ वृषोत्सर्गं न कुर्वीत गां च दद्यात् पयस्विनीमिति वचनात् ॥ वृषोत्सर्गं च कुर्वीतेति वचनादेकादशाहे मुख्यकाले मातृस्थापनपूजाभ्युदयिकश्राद्धरहित वृषोत्सर्गः कर्तव्यः ॥

अथ वृषोत्सर्गप्रयोगः ॥ आचान्तः पूर्वाभिमुख उपविश्य । सव्येन ॥ कुशतिलजलान्यादाय अद्यशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिस्वर्गलोकगमनार्थं वत्सतरीसहितवृषोत्सर्गमहं करिष्ये इति संकल्पं कुर्यात् ॥ तत उत्तराभिमुखं ब्राह्मणमुपवेशयेत् ॥ अद्यामुकगोत्रस्याऽमुकप्रेतस्य कर्तव्यवृषोत्सर्गाङ्गभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रमुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलपूगीफलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् ॥ वृतोऽस्मीति प्रतिवचनम् ॥ यथाविहितं कर्म कुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति यजमानेनोक्ते करवाणीति प्रतिवचनम् ॥ ततः ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य कर्तव्यवृषोत्सर्गाङ्गभूतहोमकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलपूगीफलवासोभिर्होतृत्वेन त्वामहं वृणे । इति होतृब्राह्मणं वृणुयात् ॥ वृतोऽस्मीति प्रतिवचनम् ॥ यथाविहितं कर्म कुरुत यजमानेनोक्ते करवाणीति प्रतिवचनम् । ततो होता आचान्तः प्राङ्मुखोपविष्टो गोमयेनोपलिप्ते प्रागुदक्प्रवणे देशे कुशैर्हस्तमात्रां चतुरस्रभूमिं परिसमूह्य कुशानैशान्यांक्षिप्त्वा गोमयोदकेनोपलिप्य मध्ये प्रादेशमात्रमुत्तरोत्तरक्रमेण दक्षिणहस्ताऽनामिकाङ्गुष्ठाभ्यां संगताभ्यामुद्धृत्य ऐशान्यां क्षिप्त्वा तं देशं जलेनाभ्युक्ष्य तत्र दक्षिणहस्तस्थकांस्यपात्रेण अग्निं स्थापयेत् ॥ अग्नेर्दक्षिणतः परिस्तरणभूमिमतिक्रम्य शुद्धमासनमुपकल्प्य तत्र प्राग्यकुशैः स्तरणंविधाय ब्राह्मणमग्नेर्वायव्यात्प्रदक्षिणमानीय कल्पितासने बहिर्हस्तमुपवेशयेत् ॥ ततोऽग्नेरुत्तरतः स्तरणभूमिमतिक्रम्य कुशत्रयमास्तीर्य्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDP

तत्र मृत्पात्रवद्धसेतुं धृत्वा उदकक्षीरं च ब्रह्मणोमुखमवलोक्य निदध्यात् ॥ तत उपमूलसकृल्लूनबर्हिषां मुष्टिचतुर्भागेन आग्नेयादीशानान्तं प्राच्यां, ब्रह्मणोऽग्निपर्यन्तं दक्षिणस्यां, नैर्ऋत्याद्वायव्यान्तं पश्चिमस्यां, अग्नितः प्रणीतापर्यन्तमुत्तरस्यां स्तरणं कुर्यात् ॥ उत्तरतः प्रणीता पश्चिमे प्राक्संस्थमुदक्संस्थं वा उपयोक्ष्यमाणानामासादनम् ॥ तद्यथा पवित्रच्छेदनार्थं कुशपत्रत्रयम् ॥ पवित्रार्थमन्तर्गर्भिणं साग्रं कुशपत्रद्वयं प्रोक्षणयर्थेमृत्पात्रं आज्यार्थंताम्रस्थाली पायसंचर्वर्थंमृत्तिकास्थाली स्रुवसम्मार्जनार्थकुशपत्रत्रयं उपग्रहार्थंवेणीरूपकुशत्रयं प्रादेशमितंपलाससमित्त्रयं स्रुवः आज्यं तण्डुलाः दुग्धं एवमासाद्य तदुत्तरतः सिद्धमेव पिष्टम् ब्रह्मदक्षिणार्थं पूर्णपात्रं होतृद-दक्षिणार्थं वस्त्रयुग्मं सुवर्णकांस्यान्युपकल्पयेत् ॥ ततः आसादितकुशपत्रद्व-यमादाय पवित्रच्छेदनकुशैः प्रादेशमात्रं समादाय क्षिप्त्वा तानपास्य पवित्रेण प्रतीतोदकं च प्रोक्षिण्यां निधाय उदगग्रपवित्रव्यस्तहस्तयोरङ्गुष्ठाऽनामिका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यामन्तरमादाय तन्मध्येन प्रोक्षण्युदकं त्रिः क्षिप्त्वा पवित्रे प्रोक्षण्यां निधाय तत्पात्रं दक्षिणहस्तेनादाय वामे निधाय ।। दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां तज्जलं किंचिदूर्ध्वप्रक्षिप्य प्रणीताजलेन प्रोक्षणीरभिषिच्य तज्जलेन यथासादितं द्रव्यं प्रत्येकं सकृत्प्रोक्ष्य पवित्रशेषजलसहितं पात्रं प्रणीताग्न्योरन्तरे निधाय आज्यस्थाल्यामाज्यं निरूप्य चरुस्थाल्यां प्रोक्षण्युदकं प्रक्षिप्य एकत्र प्रदेशे रुद्रहोमार्थं दुग्धं निक्षिप्य प्रणीतोदकेन त्रिः प्रक्षालिततण्डुलान् चरुस्थाल्यां निक्षिपेत् ।। स्वयं चरुं ब्रह्मणा चाज्यं गृहीत्वा प्रदक्षिणीकृत्य अग्निपूर्वेण नीत्वा दक्षिणः आज्यम् उत्तरतः पायसचरुंश्रपणार्थं युगपदग्नौ निधाय ।। ज्वलत् तृणमादायाऽऽज्यचर्वोरुपरि प्रदक्षिणं भ्रामयित्वा अग्नौ क्षिपेत् । स्रुवस्य प्रागग्रयावाङ्मुखस्याग्नौ प्रतपनम् ।। सम्मार्ज्जनकुशैः सम्मार्ज्जनम् । प्रणीताजलेन स्रुवः प्रोक्षणं पुनः प्रतपनम् ।। आस्तृतबर्हिषि स्वपुरतः प्रागग्रस्थापनं विधाय ।। पाकेवृत्ते स्वयमाज्यमुद्वास्याग्निं पश्चिमेन नीत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri Siddhanta Gyaan Kosha

प्रागग्रस्थापनं विधाय ॥ पाकेवृत्ते स्वयमाज्यमुद्वास्याग्निं पश्चिमेन नीत्वा-

ऽऽज्योत्तरतो निदध्यात् ॥ प्रोक्षणीतः पवित्रे समानीयाज्ये प्रोक्षणीवदुत्पवनम् ॥ पवित्रे प्रोक्षण्यां निधाय ॥ आज्यं अवेक्ष्य ॥ सत्यपद्रव्ये तन्निरस्य ॥ पुनः प्रोक्षण्युत्पवनं विधाय ॥ पायसचरोरुत्तरतः पूर्वसिद्धपिष्टचरुं निधाय ॥ होमसमाप्तिपर्यन्तमुपग्रहार्थं कुशैर्वामहस्ते उपग्रहं विधाय ॥ प्रजापतिं चिन्तयन्नुत्तिष्ठन्प्रागग्रघृताक्तसमित्त्रयं प्रक्षिप्योपविश्य । पवित्रे गृहीत्वा । प्रोक्षणीजलेनाग्निं पर्युक्ष्य ॥ पवित्रे प्रणीतासु निधाय ॥ प्रोक्षणीपात्रं स्वस्थाने निदध्यात् ॥ अथ प्रदक्षिणंजान्वाच्य जुहोति स्थाने उपतिष्ठन् प्राङ्मुखाऽन्वारब्धः स्रुवेण षडाज्याहुतीर्जुहुयात् ॥ नकुर्याद्धोममन्त्राणां पृथगादिषु कुत्रचित् ॥ अन्येषां चावकृष्टानां कार्य्यमाचमनादिनेति परिशिष्टवचनात् ॥ ॐ काररहिता षडाज्याहुतीर्दद्यात् ॥ तद्यथा ॥ ब्रह्मणाऽन्वारब्धः स्रुवं गृहीत्वा ॥ दक्षिणजानु नमयित्वा ॥ संस्रवं विनैवाऽऽज्येन षडाहुतीर्जुहुयात् ॥ स्वाहान्ते होमः- इदमग्नये० इति त्यागः ॥ इह रतिः स्वाहा ॥ इदमग्नये० ॥ इह मध्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वाहा । इदमग्नये । इह धृतिः स्वाहा । इदमग्नये ॥ इह स्वधृतिः स्वाहा ॥ इदमग्नये ॥ उपस्तृजं धरुणं मात्रे धरुणो मातरन्धयन् स्वाहा ॥ इदमग्नये० ॥ रायस्पोषमस्मासुदीधरत् स्वाहा ॥ इदमग्नये० ततो ब्रह्मणान्वारब्धो जुहोति ॥ अग्नेर्दक्षिणभागे मनसा ॥ ॐ मनवे प्रजापतये स्वाहा ॥ इदं प्रजापतये ॥ अग्नेरुत्तरभागे ॐ इन्द्राय स्वाहा इदमिन्द्राय ॥ तत उत्तरार्द्धे ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये ॥ दक्षिणपूर्वार्द्धे ॥ ॐ सोमाय स्वाहा ॥ इदं सोमाय ॥ इत्याघारावाज्यभागौ संस्रवं हुत्वा समिद्धतमेऽग्नौ संस्रवं विनैव पायसेन नवाहुतयो दातव्याः ॥ तद्यथा ॥ ॐ अग्नये स्वाहा ॥ इदमग्नये ॥ ॐ रुद्राय स्वाहा ॥ इदं रुद्राय ॥ ॐ सर्वाय स्वाहा ॥ इदं सर्वाय । ॐ पशुपतये स्वाहा । इदं पशुपतये । ॐ उग्राय स्वाहा ॥ इदमुग्राय ॥ ॐ असनये स्वाहा ॥ इदमसनये ॥ ॐ भवाय स्वाहा ॥ इदं भवाय ॥ ॐ महादेवाय स्वाहा । इदं महादेवाय ॥ ॐ ईशानाय स्वाहा । इदमीशानाय ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति हुत्वा पिष्टकेन जुहुयात् । ॐ पूषा गां अन्वेतु नः पूषा रक्षतु सर्वतः ॥ पूषा वाजसनोतु नः स्वाहा इदं पूष्णे० ॥ ततः पायसपिष्टिकाभ्यां ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते ॥ ततः आज्येनाऽग्नेर्मध्यभागे ॐ भुः स्वाहा । इदमग्नये ॥ ॐ भुव स्वाहा । इदं वायवे ॥ ॐ स्वः स्वाहा । इदं सूर्याय ॥ ॐ त्वन्नोऽग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा । इदमग्निवरुणाभ्यां० ॥ सत्वन्नोऽअग्ने वमो भवोतीने दिष्टो अस्या ऽ उषसोव्युष्टौ । अवयक्ष्वणो वरुणꣳ रराणोबीहि मृडीक3सुहवो न ऽएधि स्वाहा ॥ इदमग्निवरुणाभ्यां० ॥ अयाश्चाग्नेस्यनभिशस्ति पाश्च सत्वमित्व मयाऽअसि ॥ अयानो यज्ञं वहास्ययानो धेहि भेषज ꣳस्वाहा । इदमग्नये० ॥ ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा विततता महान्तः ॥ तेभिर्नो अद्य सविता तविष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वर्काय स्वाहा ॥ इदं वरुणायसवित्रेविष्णवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

विश्वेभ्यो मरुद्भ्यः स्वर्केभ्यः॥ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳ श्रथाय ॥ अथा वयमादित्यव्रते तवानागशो अदितये श्याम स्वाहा । इदं वरुणाय० ॐ प्रजापतये स्वाहा इदं प्रजापतये नमम इति मनसा । एवं हुत्वा संस्रवप्राशनम् ॥ आचमनं च कृत्वा पवित्राभ्यां शिरः सम्मार्ज्जनम् ॥ सुमित्रियानऽआपओषधयः सन्तु इति मन्त्रेण ॥ ततो दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति मंत्रेणशान्यां प्रणीताविमोकः ॥ ततः फलपुष्पान्वितेन घृतेन ॥ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम् ॥ कवि3 शम्राजमतिथिं जनानामासन्नापात्रञ्जनयन्तदेवाः स्वाहा । इदमग्नये ॥ इति यजमानसहितो होता पूर्णाहुतिं कुर्यात् ॥ ततस्तरणक्रमेण बर्हिरुत्थाप्याऽऽज्येनाभिघार्य ॥ ॐ देवा गातु विदोगातुं वित्वागातुमित ॥ मनसस्पत इमं देवयज्ञ ꣳ स्वाहा वातेधाः । स्वाहा । इदमग्नये ॥ इति बर्हिर्होमं कुर्यात् ॥ ततो यजमानः कुशति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदमग्नये ॥ इति बहिर्होम कुर्यात् ॥ ततो [illegible]

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लजलान्यादाय ॥ अद्यकर्तव्यवृषोत्सर्गाङ्गभूतकृतैतद्धोमकर्मणि कृताकृता-वेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति ब्राह्मणाय दक्षिणां दद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ ततो वस्त्रयुगसुवर्णकांस्यान्युपनीय कुशादीन्यादाय अद्य कर्त-व्यवृषोत्सर्गाङ्गभूतकृतैतद्धोमकर्मप्रतिष्ठार्थमेतानि वस्त्रयुगसुवर्णकांस्यानि बृहस्प-तिवह्निचन्द्रदैवतान्यमुकगोत्रायामुकशर्मणे ब्राह्मणाय होतृदक्षिणां तुभ्यमहं संप्रददे इति होत्रे दक्षिणां दद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ ततो द्विहायन-मेकहायनं वा जीववत्सायाः पयस्विन्याः पुत्रं नीलादिवर्णम् । लोहिता यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ॥ श्वेतः खुरविशाणाभ्यां स नीलोवृष उच्यते ॥ इति लक्षणलक्षितं यथालाभं वा आनीय ततश्चतस्रः द्वे एकांवा एकवर्षाधिकां वत्सतरीमानीय अग्निसमीपे सुशिक्षितगोपालेनऽग्रीयं वृषभं संवेशयेत् ॥ ततो रुद्राध्यायं पठन् वृषसमीपं गत्वा । मानस्तोके तनये मानऽआयुषीतिमंत्रणाग्नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

मपाददक्षिणपार्श्वे कुंकुमलाक्षारसचंदनादिना त्रिशूलं लिखेत् ॥ वृषो ह्यसि भानुनाद्युमन्तस्त्वा हवामहे ॥ एवमानः स्पृशमिति मन्त्रेण पश्चिमपादवामपार्श्वे चक्रं लिखेत् वृषभस्य ॥ तथा छन्द्रापरिशिष्टे ॥ ततोऽनेनैव गन्धेन मानस्तोके इतीरयन् ॥ वृषभस्य दक्षिणे पार्श्वे त्रिशूलाङ्कं समालिखेत् ॥ वृषोह्यसीति सव्यं चक्राङ्कमपिदर्शयेत् ॥ तप्तेन पश्चादयसा स्पष्टे ते च कारयेदिति ॥ अयसा लोहेन ॥ ततो लोहकारमाहूय वृषभमङ्कयेति ब्रूयात् ॥ ततोऽग्निसंतप्तलोहेन त्रिशूलं चक्रं च स्पष्टं कारयित्वा तमुत्थाप्य वत्सतरीसहितं वृषभं वक्ष्यमाणमन्त्रैः स्नापयेत् ॥ तत्र मंत्राः ॥ हिरण्यवर्णाः शुचयः पावकाया सुजातः कश्यपोयास्त्विन्द्रः ॥ याऽअग्निं गर्भं दधिरे सुवर्णास्ता नऽआपः शं स्योना सुहवा भवन्तु ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवयश्यं जनानाम् ॥ या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्योनासुहवा भवन्तु ॥ यासां देवा दिविकृण्वन्ति भक्ष्यं या अन्तरिक्षे बहुधा भवन्ति ॥ या अग्निं गर्भं

Nepal Sanskrit University, Research Campus, Kathmandu

CC-0. In Public Domain. Digitization By eGangotri.Funding: MIDF

दधिरेस्तान आपःशंस्योना सुहवा भवन्तु ॥ शिवेनमा चक्षुषा पश्यतायः शिवाय तन्नोपस्पृतत्वचम्मे ॥ घृतश्च्युतः शुचयो याः पावकास्तानऽ आपः शं० ॥ शन्नो देवीरभिष्टयऽआपो भवन्तुपीतये ॥ शंयोरभिस्त्रवंतु नः इति ॥ ततो लोहघण्टिकानूपुरकनकपट्टिकाश्वेत वस्त्रादिभिर्वत्सतरीसहितंवृषभमलङ्कृत्य ॥ सावित्रीमघमर्षणंरुद्रान्पुरुषसूक्तं। यद्देवादेवहेडनमित्यादि ऋक्त्रयं कृष्माण्डीश्च जपेत् ॥ ततो वृषभस्य दक्षिणकर्णे पिता वत्सानां पतिरघ्न्यानामथो पितामहस्तां गर्गराणाम् ॥ वत्सो जरायुः प्रतिधुक् पियूषमामिक्षा घृतंतद्वस्य रेतः ॥ वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्त्तितः ॥ वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः। इति मन्त्रद्वयं पठित्वा वत्सतरीसहितं वृषं पूजयेत् ॥ एषोऽर्घोवत्सतरीसहितवृषभाय नमः। इदमनुलेपनं वत्सतरीसहितवृषभाय नमः ॥ एतानि पुष्पाणि वत्सतरीसहितवृषभाय नमः ॥ एतानि धूपदीपनैवेद्यानि वत्सतरीसहितवृषभाय नमः ॥ ततः कुशतिल जलान्यादाय सव्येन। अद्याशौचान्तद्वितीये-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri. Funding: MIDF

ह्यिअमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिपूर्वकाक्षयस्वर्गप्राप्तिकामो रुद्रदैवतमे-
नं युवानंपतिं वाददानि ॥ तेन क्रीडन्तोश्च रथप्रियेणमानः साप्तजनुषा सुभगा-
रायस्पोयेण समिषामदेम ॥ इत्युत्सृजेत् । नीलवृषे नीलपदप्रक्षेपः । एतयैवोत्सृ-
जेरन्निति पारस्करवचनात् । अनयैव ऋचोत्सर्गः ॥ ततः ऐशानीं दिशं वत्सत-
रीसहितं वृषभं चालयेत् ॥ वत्सरोमध्यगतं वृषभमभिमन्त्रयेत् ॥ तत्र मंत्राः ॥
मयो भूरभिमावाहि स्वाहा मारुतो सितमरुतां गणः । शंभूर्मयो भूरभिमावा-
हि स्वाहा वस्यूरसि दुवस्वाच्छंभूरभिमावाहि स्वाहा ॥ यास्ते अग्ने सूर्ये
रुचो दिवमातन्वन्ति रश्मिभिः ॥ ताभिर्न्नोऽअद्य सर्वाभिरुचे जनायनस्कृधि ॥
यावो देवाः सूर्य्य रुचो गोष्वपूश्वेषुजारुजाः ॥ इन्द्राग्नी ताभिः सर्व्वाभिरुच-
न्नो धत्त बृहस्पते ॥ रुचन्नोधेहि ब्राह्मणेषु रुचꣳराजसु नस्कृधि । रुचं विश्वे-
षु शूद्रेष्वपिधेहि रुचारुचम् ॥ तत्वायामि ब्रह्मणावन्दमानस्तदाशास्ते यज-
मानो हविर्भिः ॥ अहेडमानो वरुणेहबोध्युरुश.3समानऽआयुः प्रमोषीः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वर्णघर्म्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहास्वर्णसूर्य्यः स्वाहा इति ॥ ततः कृतापसव्यो दक्षिणाभिमुखो वामजानु पातयित्वा वृषभपुच्छसहिततिलकुशान्यादाय ताम्रपात्रस्थजलेन मन्त्रस्थफलमुद्दिश्याञ्जलित्रयेण तर्पयदेभिमन्त्रैः ॥ स्वधा पितृभ्योमातृभ्यो बन्धुभ्यश्चापि तृप्तये ॥ १ ॥ मातृपक्षाश्च ये केचिद्ये चान्ये पितृपक्षजाः ॥ गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ॥ १ ॥ ये प्रेतभावमापन्ना य चान्ये श्राद्धवर्जिताः ॥ वृषोत्सर्गेण ते सर्वे लभन्तां तृप्तिमुत्तमामिति ॥ ततो लोहकारमाहूय अभिमतं वेतनं तस्मै दद्यात् ॥ उत्सृष्टं ब्राह्मणानाश्रावयेत् ॥ यत्किञ्चिद्द्विजजनायोत्सृष्टं तदन्येन न नेतव्यं न वाह्यं तत्त्वीरं न पातव्यं केनचित् क्वचिदिति ॥ ततो रुद्राग्रे बहुसर्पिष्कं पायसं ब्राह्मणान् भोजयेत् इति वृषोत्सर्गः ॥ विष्णुः ॥ होत्रे वस्त्रयुगं दद्यात्सुवर्णं कांस्यमेव च ॥ अयस्काराय दातव्यं वेतनं मनसेप्सितम् ॥ ब्रह्मपुराणे ॥ न च बाह्यो न तत्त्वीरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitizationby eGangotri.Funding: MIDF

पातव्यं केनचित्क्वचित् । अङ्कितं वृषमुत्सृष्टं यो वाहयति दुर्मतिः ॥ कुलानि पातयेत्तस्य नरके नात्र संशयः ॥ अत्र फलश्रुतिः ॥ तत्र विष्णुः-उत्सृष्टो वृषभो यस्मिन्पिवन्त्यथ जलाशये ॥ जलाशयः समकालंपितॄँस्तस्य प्रतिष्ठति ॥ शृंगाग्रेणोल्लिखेद् भूमिर्यन्न क्वचनचदर्पितः । पितॄणामन्नपानं तत्प्रभूतमुपतिष्ठति । वृषोत्सर्गं पितॄणामात्मनोऽपि च ॥ छान्दोगपरिशिष्टे ॥ यमलोके मया दुष्टा भवनौ यमकिङ्करैः ॥ पात्यमानास्त एवाद्य कथं स्वर्लोकमागताः ॥ प्रेतं विमुच्यतां तात उत्सृष्टो वृषभो भुवि ॥ सुचिना तेन पुत्रेण तारिता महतो भयात् ॥ सर्वेषां चैव यज्ञानां वृषोत्सर्गः समो मतः ॥ स्पर्द्धते योऽश्वमेधेन क्रतुकोटिसमो यतः । आदित्यपुराणे ॥ यावन्ति रोमकूपानि वृषभस्य भवंति हि ॥ गवां चैव तु रोमाणि यावन्ति मुनिपुङ्गव ॥ तावत्कोटिसहस्राणि रुद्रलोके महीयते ॥ यत्किंचित्कुरुते पापं पुरुषो वृत्तिकर्षितः ॥ तत्सर्वं शान्तिमायाति वृषोत्सर्गेणतत्क्षणात् ॥ वृषभस्य तु शब्देन पितरः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सपितामहाः ॥ आवर्त्तमाना दृश्यन्ते स्वर्गलोके न संशयः ॥ जले प्रक्षिप्य लांगूलं तोयं चोद्धरते वृषः ॥ दशवर्षसहस्राणि पितरस्तेन तर्पिता ॥ गवां मध्ये यदा चैव वृषभः क्रीडते तु यत् ॥ अप्सरौघसहस्रेण क्रीडति पितरः स्ततः ॥ कूले समुद्धृतायां च शृंगे तिष्ठति मृत्तिका ॥ भक्षभोज्यमया शैलाः पितरस्तेन तर्पिता ॥ लाङ्गूलं यावदुद्धम्य तोये प्रक्रीडते तु सः ॥ अप्सरौघसहस्रैस्तु हृष्यंति पितरः सदा ॥ सहस्रहलमात्रेण कनकेन यथाविधि ॥ तृप्तिस्तु यावान् पितॄणां सावैवृषसमोच्यते ॥ एवं स्त्रियाऽअपि ॥ तत्र अद्य अमुकगात्राया अमुकप्रेतायाः ॥ इति विशेषः ॥ अथ कपिलादानम् ॥ कपिलासमीपं गत्वा ॥ नमो गोभ्यः श्रीमताभ्यः सौरभेयीभ्य एव च ॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥ इति मन्त्रेण कपिलां पुष्पचन्दनधूपदीपनैवेद्यादिभिः सम्पूज्य ॥ कुशजलेन गामभ्युक्ष्य ॥ कुशादीन्यादाय अद्याशौचान्तद्वितोयेऽहि अमुकगोत्रस्यामुकप्रेतस्य स्वर्गप्राप्तिकाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इमां कपिलां गां सवत्सां हेमशृङ्गीं रौप्यखुरीं ताम्रपृष्ठीं वस्त्रयुगच्छन्नां मुक्तालांगूलभूषितां रुद्रदैवतामसुकगोत्रायाऽसुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इत्युक्त्वा दद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ प्रार्थना ॥ कपिले सर्वदेवानां पूजनीयासि रोहणी ॥ तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे । ततो दानप्रतिष्ठाद्रव्यादिकमादाय ॥ अद्यकृतैतत् सोपस्करणसवत्सकपिलागोदानप्रतिष्ठार्थमिदं हिरण्यमग्निदेवतममुकगोत्रायाऽसुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दानप्रतिष्ठा ॥ दक्षिणां च दद्यात् ॥ ततः प्रतिग्रहीता ॥ कोदात् कस्माऽअदात् कामोदात् कामायाऽदात् ॥ कामो दाता कामः प्रतिग्रहीता कामैतत्ते इति कामस्तुतिं पठेत् ॥ गोपुच्छग्रहणं कृत्वा ॥ यथोक्तकपिलाभावे केवलां गामपि दद्यात् ॥ ततः सचैलं स्नायात् । अथैकादशाहे आद्यमासिकश्राद्धप्रयोगः ॥ कर्ता सुचिराचान्तः शुक्लद्विवासाः गोमयेनोपलिप्तायां भूमौ दर्भेषु तिष्ठन् भूम्यै नमः इति त्रिः भूमिं सम्पूज्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यजमानसवर्णेनाहूतमाचान्तं ब्राह्मणं स्वागतमिति पृच्छेत् ॥ सुस्वागतमितितेनोक्ते उभावुपविशतः ॥ ततः श्राद्धकर्ताऽपसव्येन पुष्पचंदनपूगीफलानि ब्राह्मणाय दत्वा ब्राह्मणदक्षिणजानु स्पृष्ट्वा अद्यामुकगोत्रस्याऽमुकप्रेतस्याद्यमासिकश्राद्धकरणाय भवन्तं ब्राह्मणमहमामन्त्रये ॥ आमंत्रितोऽस्मीति प्रतिवचनम् ॥ अक्रोधनैः शौचपरैः सततं ब्रह्मवादिभिः ॥ भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा । सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ॥ भवितव्यं भवद्भिर्नोद्यतने श्राद्धकर्मणि ॥ इति पात्रब्राह्मणं नियमान् श्रावयेत् । भवितव्यमिति तेनोक्ते ॥ अर्घपात्रं वामहस्ते कृत्वा गन्धपुष्पादिनाऽभ्यर्च्य कुशं गृहीत्वा अद्यामुकगोत्राऽमुकप्रेताद्यमासिकश्राद्धे एष पादार्घस्ते मया दीयते तवोपतिष्ठतामिति पादार्घं दद्यात् ॥ ततस्तिलतैलेन विप्रपादौ आजानु अभ्यङ्गयेत् ॥ ततः सव्येनाचम्य पात्रब्राह्मणमग्रे कृत्वा श्राद्धदेशमागत्योपविश्यान्नाभिप्रायेण सिद्धमिति पृच्छेत् । ततो दक्षिणाग्रे कुशसहितनेपा-

9228E
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लकस्बलाद्यात्मकमासनमुपकल्प्याऽसनं संस्पृशन् ॥ अत्र देवराजाभ्यनुज्ञातो विश्रम्यतां द्विजवर्योनुग्रहात् ॥ प्रासादये त्वा समगृह्ण तज्ञानापूग्निपूतेन करेण विप्रः इति मन्त्रं पठित्वा पात्रब्राह्मणं दक्षिणहस्ते धृत्वोदङ्मुखमुपवेशयेत् ॥ ततः पात्रब्राह्मणस्य पादस्थले दक्षिणाऽग्रकुशत्रयं दद्यात् ॥ तद्रक्षा च पात्रब्राह्मणेन कार्या ॥ रक्षोघ्नान्गौरसर्षपान् तिलांश्च श्राद्धदेशे विकिरेत् ॥ ततः पूर्वाभिमुखः सव्यं कृत्वा कुशोदकेन-अपवित्रः पवित्रो वा सर्वावस्थाङ्ग गतोऽपि वा ॥ यः स्मरेत् पुण्डरीकाक्ष स बाह्याभ्यन्तरः शुचिः ॥ इति पठित्वा पुण्डरीकाक्षः पुनात्विति पुण्डरीकाक्षं स्मृत्वा श्राद्धीयद्रव्याण्यात्मानं च सिंचेत् ॥ तत कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिकामो यथा कालमाद्यादिषोडशश्राद्धान्यहं करिष्ये - इति संकल्पः ॥ तस्मिन् वर्षे मरणदिनमारभ्य द्वादशमासेषु मध्ये अधिकमासे पतिते षोडशपदस्थाने सप्तदशपदं याज्यम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः कुशतिलजलान्यादाय ॥ अद्यामुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतोषोडशश्राद्धान्तर्गताऽऽद्यमासिकश्राद्धमहं करिष्ये इति संकल्प्य ॥ कुरुष्वेति ब्राह्मणप्रतिवचनम् ॥ ततः सव्येन देवताभ्यः त्रिवारं पठेत् ॥ ततोऽपसव्यं कृत्वा ॥ दक्षिणाभिमुखः पातितवामजानुः कुशादिकमादाय ॥ अद्यामुकगोत्रस्याऽमुकप्रेतस्याद्यमासिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठामिति कुशरूपमासनं दक्षिणाग्रमुत्सृजेत् ॥ अथ छत्रदानम् ॥ ततः सव्यं कृत्वा प्राङ्मुखोपविष्ट छत्राय नमः ॥ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः संपूज्य छत्रमभिषिंच्य कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य यमपथाधिकरणकघोराऽऽतपवारणार्थमिदं छत्रमुत्तानाङ्गिरो दैवतमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । इत्युक्त्वा विप्रहस्ते जलं दत्वा ॥ स्वस्तीति प्रतिवचनम् ॥ प्रार्थना । सर्वेषामेव दानानां छत्रमातपवारणम् ॥सुखदं मोक्षदं यस्मात्तस्माच्छान्ति प्रयच्छतु । ततः कुशतिल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलयुतदानप्रतिष्ठामादाय ॥ अद्य कृततैतच्छत्रदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे ॥ इति दक्षिणां दद्यात् ॥ प्रतिग्रहीता स्वस्तीत्युक्त्वा छत्रदण्डं धारयेत् ॥ अथ उपानहद्दानम् ॥ उपानहद्भ्यां नमः ॥ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः संपूज्य उपानहावभिषिच्य कुशादोन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य संतप्तबालुकाऽसिकंटकितभूदुर्गसंतरणार्थमिमे उपानहावुत्तानांगिरोदैवते अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दद्यात् । स्वस्तीति प्रतिवचनम् ॥ प्रार्थना ॥ उपानहौ प्रदास्यामि कंटकादिनिवारणे ॥ सर्वस्थानेषु सुखदे अतः शान्ति प्रयच्छतः ॥ कुशादोनि दानप्रतिष्ठांदक्षिणां चादाय ॥ अद्य कृतैतदुपानद्दानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इतिदानप्रतिष्ठां दक्षिणां च दद्यात् ॥ प्रतिग्रहीता स्वस्तीत्युक्त्वा उपनहावारोहयेत् ॥ अथाश्वदानम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दद्यात् ॥ प्रतिग्रहीता स्वस्तीत्युक्त्वा उपनहावारोहयेत् ॥ अथोद्वहनम् ॥
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देयब्रह्मणौ त्रिः संपूज्य देयमभिषिच्य कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्यातिविषमदुर्गसंतरणार्थमुकमश्वंयमदैवतं सपर्याणममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दद्यात् ॥ प्रार्थना ॥ विश्वस्त्वमश्वरूपेण यस्मादमृतसंभवः ॥ चन्द्रार्कवाहनं नित्यमतः शान्तिं प्रयच्छ मे ॥ ततः कुशादीनि दानप्रतिष्ठां दक्षिणां चादाय ॥ अद्य कृतैतदश्वदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दक्षिणां दद्यात् ॥ ततः प्रतिग्रहीता स्वस्तीत्युक्त्वा अश्वस्य दक्षिणकर्णं स्पृशेत् ॥ अथ शिविकादानम् ॥ देयब्राह्मणौ त्रिः संपूज्य देयं चाभ्युक्ष्य कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य उच्चावचविषमभूतरणार्थमिमां शिविकां उत्तानांगिरोदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दद्यात् ॥ प्रार्थना ॥ देवदेव जगन्नाथ विश्वात्मन् दत्तयाऽनया ॥ प्रभो शिविकया देव प्रीतो भव जनार्दन ॥ ततः कुशादीनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानप्रतिष्ठां दक्षिणां चादाय ॥ अद्यकृतैतच्छिविकादानप्रतिष्ठार्थं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ इति दक्षिणां दद्यात् ॥ ततः प्रतिग्रहीता स्वस्तीत्युक्त्वा शिविकां स्पृशेत् ॥ तथा च ब्रह्मपुराणे ॥ उपविश्यासने भद्रे छत्रं तत्र प्रकल्पयेत् ॥ आचार्य्याय च तच्छत्रं ब्राह्मणाय प्रकल्पयेत् ॥ पश्चादुपानहौ दद्यात् सा चैव शिविकां तथा ॥ बृहस्पतिः ॥ वस्त्रालंकारशय्यादि यत् पित्र्युद्वाहनादिकम् ॥ गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रऽथ तर्पयेत् ॥ ततः आचम्याऽपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुः ॥ अपहता असुरा रक्षाꣳसि वेदिषद इति श्राद्धदेशे वामावर्तेन तिलान् विकिरेत् ॥ ततो हस्तार्घपात्रोपरि पवित्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ इति दक्षिणाग्रं पवित्रं धृत्वा ॥ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः इति जलं दत्वा ॥ तिलोसि सोमदैवत्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोसवो देवनिर्मितः ॥ प्रत्नमद्भिः ॥ पृक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहा इति तिलान् क्षिप्त्वा ॥ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽ इषाणसर्वलोकम्मऽ इषाणेति पुष्पं दत्वा । गंधद्वारेति गन्धं दद्यात् ॥ हस्तार्घपात्रं संपन्नमिति पात्रब्राह्मणं स्पृष्ट्वा सुसंपन्नमिति तेनोक्ते हस्तार्घपात्रं वामहस्ते कृत्वा । नमो नारायणायेति पुष्पसहितं पवित्रं विप्रहस्ते उत्तराग्रं धृत्वा ॥ या दिव्याऽआपः पयसा संब्रभूवुर्य्याऽअन्तरिक्षाऽउत पार्थिवीर्य्याः । हिरण्यवर्णा यज्ञियास्ता नऽआपःशिवाःश3स्योनाः सुहवा भवन्तु इत्यनेन हस्तार्घपात्रस्थं जलमभिमंत्र्य ॥ कुशमादाय ॥ अद्यामुकगोत्रामुकप्रताद्यमासिकश्राद्ध एष पाद्यार्घस्ते मया दीयते तवोपतिष्ठतामिति विप्रकरे पवित्रोपरि अर्घजलं दददुत्सृजेत् ॥ पात्रब्राह्मणवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेव हस्तार्घपात्रं स्थापयेत् ॥ तदुपरि कुशान् दद्यात् ॥ तच्च दक्षिणापर्यन्तं न चालयेत् ॥ ततः पात्रब्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्मणं गंधपुष्पादिभिः संपूज्य ॥ कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेता द्यमासिकश्राद्धे एतानि चन्दनपुष्पाक्षतधूपदीपयज्ञोपवीतवासांसि ते मया दायन्ते तवोपतिष्ठतामित्युत्सृजेत् ॥ ततः सव्यंकृत्वा ॥ प्रेतस्य भुक्तशय्यासनादीन् गंधपुष्पैरभ्यर्च्य श्राद्धभोक्त्रे प्रतिपादयेत् ॥ ततः आचम्यापसव्यं कृत्वा । अर्चनविधेः सर्वं परिपूर्णमस्तु इत्युक्ते अस्त्वीति ब्राह्मणप्रतिवचनम् ॥ ततो गौरमृत्तिकया नोवारचूर्णेन जलेन वा ब्राह्मणं वेष्टयित्वा चतुरस्रं मण्डलं कुर्य्यात् ॥ परकीयभूमौश्राकरणे श्राद्धीयवस्तुषु किंचित्किंदुद्धृत्य तिलघृतजलयुतमन्नमादाय । इतमेतद्भूस्वामिपितृभ्यो नमः इति दद्यात् ॥ तत उष्णमन्नं ताम्रपात्रेण कराभ्यामादाय मनाकस्थित्वा पुरुषतृप्तिक्षममन्नं परिविष्यात् ॥ ततः इदं मधुरं इदमम्लमित्यादि व्यंजनगुणान् कीर्त्तयन् सर्वाणि व्यंजनानि भूमिस्थपात्रान्तरेषु परिविष्य घृतं सतिलजलं चोपनीय अन्नं मधुनाभिघारयेत् ॥ ततः पात्रालंभनाङ्गुष्ठावगाहनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनैव, पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥ इति पठित्वा ॥ अपहता असुरा रक्षाꣳसि वेदिषदः ॥ इत्यन्नोपरि तिलान् विकीर्य्य ॥ अमृतरूपतया अन्नं विचिन्त्य कुशादोन्यादाय ॥ अद्यामुकगोत्रा-याऽमुकप्रेतायाऽऽद्यमासिकश्राद्धे इदमन्नं सोपकरणं मया दीयते तवोपतिष्ठता-मित्युत्सृजेत् ॥ ततो भवान् प्राशयतु इत्यापोशनं दत्वा । यथामुखं जुषस्वेति ब्राह्मणं ब्रूयात् । ब्राह्मणश्च वामेन पाणिनान्नपात्रमत्यजन् भुञ्जीत संज्ञया च भक्षप्रार्थनां कुर्यात् ॥ श्राद्धकर्त्ता, मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः ॥ माध्वोर्न्नः संत्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत् पार्थिवꣳ रजः ॥ मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँअस्तु सूर्य्यः ॥ माध्वीर्गावो भवन्तु नः ॥ मधु मधु मधु । अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ॥ तत्सर्वमच्छिद्र-मस्तु श्रीभास्करस्यप्रसादतः ॥ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे ॥ नमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ॥ वीणादिभिर्ब्राह्मणं हर्षयन् व्यंजनगुणान् कीर्त्तयन् तस्य यत्र यत्रेच्छोपलभ्यते तत्तदुपनयन् मन्दं मन्दं भोजयेत् ॥ अत्र विकिरनिषेधः ॥ ततो ब्राह्मणं तृप्तं ज्ञात्वा तस्मै, जलगंडूषमिदं ते इति प्रत्यापोशनं दद्यात् ॥ अत्र स्वदितं प्रश्नाभावः ॥ ततः पिण्डमहं करिष्ये इति पृच्छेत् ॥ कुरुष्वेति ब्राह्मणोक्ते तदुच्छिष्टसमीपे चतुरस्रं हस्तैकप्रमाणं दक्षिणप्लवं चतुरङ्गुलोच्छ्रितं पिण्डस्थानं निर्मिमीत ॥ तत्र रेखाकरणमुल्मुकभ्रमणं च न भवति ॥ ततः छिन्नमूलकुशान् दक्षिणाग्रान् तत्रास्तीर्य्य । पवित्रपुटकादिकं तिलजलगंधपुष्पयुतं कृत्वा दक्षिणहस्तेन कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेताद्यमासिकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामिति कुशोपरि अवनेजनं दद्यात् ॥ ततः श्राद्धशेषमन्नं तिलघृतमधुयुतमेकीकृत्य तेन कपित्थप्रमाणं पिण्डं निर्माय दक्षिणहस्ते-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एष पिण्डस्ते मया दीयते तवोपतिष्ठतामित्यवनजनस्थाने पिण्डं दद्यात् । आस्तृतकुशमूलेन करं प्रोक्ष्य ॥ सव्यंकृत्वाऽऽचम्य हरिं स्मृत्वा ॥ अपसव्यं कृत्वा । मंत्रपाठीनिषेधात्तूष्णीमेव भास्करमूर्तिं प्रेतं चिंतयेत् ॥ अवनेजनावशिष्टजलयुतपात्रं वामहस्ते कृत्वा दक्षिणहस्तेन कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेताद्यमासिकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं दद्यात् ॥ ततो नीवीं विस्रंस्य ॥ सव्यं कृत्वा ॥ वामेन पाणिना धृतं सूत्रं दक्षिणहस्तेन गृहीत्वा ॥ प्रेतैतत्ते वासः इति पिण्डोपरि धृत्वा ॥ गंधपुष्पादिभिः पिण्डं संपूज्य ॥ कुशादीन्यादाय अद्यामुकगोत्रामुकप्रेताद्यमासिकश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामित्युत्सृजेत् ॥ पिण्डशेषान्नं पिण्डसमीपे विकिरेत् ॥ततः आचान्तो ब्राह्मणस्य करे ॥ शिवा आपः संतु इति जलं ॥ सौमनस्यमस्त्विति पुष्पम् ॥ अक्षतं चारिष्टमस्त्विति तण्डुलान् दद्यात् ॥ सन्त्विति अस्त्विति च प्रति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वचनम् ॥ ततः पुटकादिपात्रे शान्त्युदकं परिकल्प्य मेदिनी शिरसाऽभिवन्द्य इदं मन्त्रं पठेत् ॥ नमो नमो मेदिनि लोकधात्रि ऊर्व्वि महीशैलधारिणि धरणि नमः । धरणि काश्यपि जगत्प्रतिष्ठे वसुधे नमोऽस्तु वैष्णवि लोकधात्रि ॥ नमोऽस्तु ते सर्वरसप्रतिष्ठे निवापनावीचि नमो नमोऽस्तु ते ॥ ततः कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्याऽद्यमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं विप्रहस्ते दत्वा । उपतिष्ठतामिति प्रतिवचनं गृहीत्वा । सव्यं कृत्वा दक्षिणां दिशं पश्यन् ॥ अघोरः प्रेतोऽस्तु इति पूर्वाग्रां जलधारां पिण्डोपरि दद्यात् ॥ अत्राशीः प्रार्थना निषेधः ॥ ततोऽपसव्यं कृत्वा । सपवित्रकुशत्रयं पिण्डोपरि दक्षिणाग्रं धृत्वा ॥ नमो वाचयिष्ये इति पृच्छेत् ॥ वाच्यतामित्यनुज्ञातः ॥ प्रेताय नमः इत्युच्यतामिति वदेत् ॥ अस्तु नमः इत्युच्यमाने ॥ पुटकादिस्थजलादिना मंत्रपाठं विना ॥ इदमूर्ज्जं ते मया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो नम्रीभूय पिण्डमाघ्रायोत्थापयेत् ॥ छिन्नमूलकुशान् वह्नौ क्षिपेत् ॥ अर्घपात्रं संचाल्य ॥ सव्यं कृत्वा । कुशादिसहितं दक्षिणाद्रव्यमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्याऽऽब्दमासिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतम-मुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॥ स्वस्तीति प्रतिवचनम् ॥ अत्र प्रदक्षिणीकरणं अनुव्रजं न भवति ॥ ततोऽपसव्येन स्वस्त्यस्तु इत्युक्त्वा ब्राह्मणमुत्थाप्य शय्यायामुपवेशयेत् ॥ ब्राह्मणचरणौ संवाह्य तं नमस्कुर्यात् ॥ ततोऽञ्जनं कङ्कतिकां च ब्राह्मणायाऽर्प-येत् । स चाञ्जनं कङ्कतिकां चादाय शय्यायां मुहूर्त्तं विश्रामं कुर्यात् ॥ ततः कर्ता सव्यं कृत्वा । देवताभ्यः इति त्रिर्जपित्वा ॥ अपसव्यं कृत्वा ॥ श्राद्धीय-दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाचमनं कुर्यात् ॥ ततः श्राद्धसंपूर्णता-कामः ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति पठित्वा विष्णुस्मरणं कुर्यात् ॥ इति षोडशश्राद्धमध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आद्यमासिकस्य एकादशेह्यवविधानादाद्यमासिकस्य सपात्रप्रयोगः ॥ अथ आद्याब्दिकश्राद्धम् ॥ प्रथममासिकश्राद्धानन्तरं स्नानादिकं विधाय आद्याब्दिकश्राद्धं कुर्यात् ॥ आद्याब्दिकस्य एकादशेऽन्हयेव विधानात् ॥ तच्च सिद्धान्नेनैव विधेयम् ॥ तत्र क्रमः ॥ कर्त्ता स्नातः शुचिरावान्तः पूर्वोपकल्पितप्रज्वालितदीपं स्थापितगौरसर्षपं तिलादिरक्षोघ्नं श्राद्धदेशमागत्य पूर्वाभिमुखउपविश्य कुशजलेन अपवित्रः पवित्रो वा सर्वेत्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति ऊच्चार्य्य श्राद्धदेशं द्रव्याण्यात्मानं च सिंचेत् । अद्येत्यादि देशकालौ स्मृत्वा ॥ अद्यामुकगोत्रस्यामुकप्रेतस्याद्याब्दिकश्राद्धमहं करिष्ये इति संकल्पं कुर्यात् ॥ ततो देवताभ्यः इत्यादित्रिः पठेत् ॥ ततोऽपसव्येन कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्याद्याब्दिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति कुशरूपमासनमुत्सृजेत् ॥ ततः अपहताऽसुरा रक्षाꣳसि वेदिषदः इति वामवर्त्तेन तिलान् श्राद्धदेशे विकिरेत् ॥ ततः पुटकादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पवित्रेस्थ इति मन्त्रेण दक्षिणाग्रं पवित्रं धृत्वा ॥ शन्नो देवीति मंत्रेण तत्र जलं क्षिपेत् ॥ तिलोसीति मंत्रेण तिलान् प्रक्षिप्य, गन्धद्वारामिति मंत्रेण गन्धं, श्रोश्चतेति मन्त्रेण पुष्पं क्षिपेत् ॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं नमो नारायणायेति मंत्रेणाऽन्नपात्रोपरि उत्तराग्रं धृत्वा ॥ या दिव्या आप इति मंत्रेणार्घपात्रस्थजलमभिमंत्र्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुक प्रेताद्यादि्बकश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलं ददद्दुत्सृजेत् ॥ ततः पवित्रादिसहितमर्घपात्रं आसनवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेव स्थापयेत् ॥ ततो गन्धादिना संपूज्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेताद्यादि्बकश्राद्धे एतानि गंधपुष्पाक्षधूपदीपवासांसि ते मया दीयन्ते तवोपतिष्ठन्तामिति गंधादिकमुत्सृजेत् ॥ ततः आसनस्थान्नपात्रसहि-तस्य चतुर्दिक्षु चतुरस्रं मण्डलं कृत्वा श्राद्धीयान्नाग्रभागं घृततिलजलयुतं पुटकादौ कृत्वा ॥ इदमन्नमेतद्भूस्वामिपितृभ्यो नम इत्युत्सृजेत् ॥ ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषतृप्तिक्षमं सोपस्करं सतिलं चान्नमुपनीय मधुनाभिघार्य्य पात्रालम्भनाङ्गुष्ठावगाहनं विना ॥ पृथिवी ते पात्रं द्यौरपिधानं इत्यादि स्वाहान्तं, इदं विष्णुरित्यादि सुरेत्यन्तं पठित्वा । अपहताऽसुरा रक्षा'3सि वेदिषद इति तिलान्नोपरि विकीर्य कुशादिकमादाय ॥ तवोपतिष्ठतामित्यन्नमुत्सृजेत् ॥ अद्यामुकगोत्रायामुकप्रेताद्यद्विष्किकश्राद्धे इदमन्नं सोपकरणं ते मया दीयते तवोपतिष्ठतामित्यन्ननुत्सृजेत् । ततो मधुव्वता इति ऋचं मधु मधु ध्वितिः पठेत् ॥ अन्नहीनमित्यादि मन्त्रं, नमस्तुभ्यं विरुपाक्षेति श्लोकं च पठेत् ॥ अत्र विकीरो रेखाकरणमुल्मुक भ्रमणंच न भवति ॥ सव्यंकृत्वाऽऽचम्याऽपसव्यं कृत्वा पिण्डस्थानोपरि छिन्नमूलकुशान् दक्षिणाग्रानास्तीर्य्य तिलजलगंधयुतं पुटकं वामहस्ते कृत्वा कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेताद्यद्विकश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामित्यवनेजनं छिन्नमूलकुशोपरि दद्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तिलघृतमधुयुक्तेनान्नेन कपित्थप्रमाणं पिण्डं कृत्वा ॥ कुशादिकमादाय अद्यामुकगोत्रामुकप्रेताद्याब्दिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठतामित्यवनेजनस्थाने पिण्डं दद्यात् ॥ ततो दर्भमूले न करं प्रोक्ष्य ॥ सव्यं कृत्वाऽऽचम्य हरिंस्मृत्वाऽपसव्यं कृत्वा मंत्रपाठं विना तूष्णीं भास्करमूर्तिं प्रेतं चिंतयेत् ॥ ततोऽवनेजनपात्रं वामहस्ते कृत्वा कुशादिकं गृहीत्वा ॥ अद्यामुकगोत्रामुकप्रेताद्याबिदकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पिण्डोपरि दद्यात् ॥ ततो नीवीं विस्रंस्य ॥ सव्यं कृत्वाऽऽचम्याऽपसव्यं कृत्वा ॥ वामेन पाणिना घृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां पिण्डोपरि प्रेतैतत्ते वासः इति सूत्रं दत्वा ॥ पिण्डमभ्यर्च्य कुशादीन्यादाय । अद्यामुकगोत्रामुकप्रेताद्याब्दिकश्राद्धपिण्डे एतानि सूत्रागन्धपुष्पधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामित्युत्सृजेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य्य । शिवा आपः सन्तु इति जलम् ॥ सौमनस्यमस्तु इति पुष्पम् ॥ अक्षतं चारिष्टमस्त्विति तण्डुलान् अन्नपात्रोपरिक्षिपेत् ॥ कुशादीन्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्याद्याब्दिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्वा ॥ सव्यं कृत्वा ॥ अघोरः प्रेतोस्तु इति दक्षिणां दिशं पश्यन् पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ॥ अत्राशीः प्रार्थनं न भवति ॥ ततः पिण्डोपरि सपवित्रान् कुशान् धृत्वा ॥ पुटकादिस्थजलादिना मंत्रपाठं विना । इनमूर्ज्जन्ते मया दीयते तवोपतिष्ठतामिति सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात् ॥ ततः पिण्डमाघ्रायोत्थापयेत् ॥ पिण्डधारकुशान् वह्नौ क्षिपेत् ॥ अर्घपात्रं संचाल्य ॥ सव्यं कृत्वा कुशादीन्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्याद्याब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय यथा नाम शर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ ततो देवताभ्यः पितृभ्यश्च महायो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गीभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥ इति त्रिः पठेत् ॥ ततोऽपसव्यं कृत्वा दीपमाच्छाद्य ॥ हस्तौ पादौ प्रक्षाल्य सव्येनाचम्य ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताऽध्वरेषु च ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिरिति पठित्वा विष्णुस्मरणं कुर्य्यात् ॥ श्राद्धीयवस्तु ब्राह्मणाय प्रतिपादयेत् ॥ सिद्धान्नं जले क्षिपेत् ॥ इत्याद्याब्दिकश्राद्धप्रयोगः ॥ अत्र दिने विहितमपि पंचगव्यप्राशनं शिष्टानाचरन्तीति न लिखितम् ॥ अथोदकुम्भदानम् ॥ तत्र हारीतः ॥ मृते पितरि वै पुत्रः पिण्डमब्दं समापयेत् ॥ अन्नं कुम्भं च विप्राय प्रेतमुद्दिश्य धर्मतः ॥ मत्स्यपुराणे ॥ यावदब्दं तु यो दद्यादुदकुम्भं विमत्सरः ॥ प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् ॥ याज्ञवल्क्यः ॥ अर्वाक्सपिण्डीकरणम् यस्य संवत्सरोद्भवेत् ॥ तस्याप्यन्नं सोदकुम्भं द्वयं दद्याद् द्विजन्मने ॥ अङ्गिराः ॥ यस्य संवत्सरादर्वाक्सपिण्डीकरणं कृतम् । मासिकं चोदकुम्भं च देयं तस्याऽपि वत्सरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ प्रयोगः ॥ एकादशेह्नि ॥ कर्त्ता शुचिराचान्तः प्राङ्मुख उपविश्य ॥ सव्येन कुशतिलजलान्यादाय ॥ अद्य पितृगताहरहन्नोपस्थितिश्वगताश्वमेधयज्ञजन्यफलसमफलप्राप्तिकामोऽद्यादिपितृमरणदिनावधिकाशौचावच्छिन्नदिनोनवत्सरं यावत्प्रत्यहममुकगोत्रायामुकप्रेताय सान्नोदककुम्भदानमहं करिष्ये इति संकल्याऽपसव्यं कृत्वा कुशादीन्यादाय ॥ अद्यामुकगोत्रास्यामुकप्रेतस्येदमासनं ते मया दीयते तवोपतिष्ठतामित्यासनमुत्सृज्य गंधपुष्पादिना पूजां विधाय ॥ कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतैतानि गंधपुष्पधूपदीपवासांसि ते मया दीयन्ते तवोपतिष्ठन्तामित्युत्सृज्य ॥ सोपस्करमन्नं नवजलपूर्णकुम्भं चोपनीय ॥ कुशादीन्यादाय ॥ अद्यामुकगोत्रायामुकप्रेताय अयं सान्नोदककुम्भस्ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् ॥ वर्षाभ्यंतरे सपिण्डने कृते ॥ अद्यामुकगोत्र पितामुकर्मन् एतानि गंधपुष्पधूपदीपवासांसि तुभ्यं स्वधा ॥ अद्यामुकगोत्राय पित्रे अमुकशर्मणे अयं सान्नोदक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुम्भस्तुभ्यं स्वधेति वाक्यं कुर्यात् ॥ ततः कुशादीन्यादाय ॥ अद्यकृतैतत्सान्नोदककुम्भदानप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय यथा नाम शर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे ॥ इति दक्षिणामुत्सृज्य ॥ दक्षिणा तदुभयं च ब्राह्मणाय दद्यात् ॥ एवं वर्षपर्यन्तंप्रत्यहं सान्नोदककुम्भं दत्वा दक्षिणां दद्यात् ॥ अशक्तौ प्रतिमासम् ॥ अत्यन्ताशक्तौ तद्दिने एव दद्यात् ॥ तत्र तु ॥ अद्यपितृगताहरहरन्नोदकुम्भोपस्थितिश्वगताश्वमेधयज्ञजन्यफलप्राप्तिकामोऽद्य सान्नोदककुम्भदानमहं करिष्ये ॥ इति सव्येन वाक्यं कृत्वा ॥ अपसव्येन ॥ आसनादिवाक्यं पूर्ववद्विधाय ॥ आशौचान्तदिनोनान् वत्सरदिनसंख्याकान्सान्नोदककुम्भानुपनीय ॥ अद्यामुकगोत्रायामुकप्रेताय मरणादिनावधिकाशौचावच्छिन्नदिनोनवत्सरं यावद्दिनसंख्याकाः एतेसान्नोदककुम्भास्ते मया दीयन्ते तवोपतिष्ठन्तामिति वाक्यं कुर्यात् ॥ दक्षिणावाक्यं पूर्ववत्कृत्वा सर्वं ब्राह्मणाय दद्यात् ॥ इत्युदककुम्भदानविधिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोनमासिकादिपञ्चदशश्राद्धानि ॥ उनमासिकादि च एकादशे द्वादशाहे वा सिद्धान्नेन आमान्नेन वा कार्याणि ॥ आमपक्षे यवचूर्णेन पिण्डाः कार्याः ॥ तानि च शिष्टा अपात्रकान्येव कुर्वन्तीति स एव प्रयोगो लिख्यते ॥ तत्र क्रमः ॥ कर्त्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितप्रज्वालितदीपं स्थापितगौरसर्षपतिलादिरक्षोघ्नश्राद्धदेशमागत्य पूर्वाभिमुख उपविश्य । कुशजलेन ॥ अपवित्र इत्यादि पठित्वा पुण्डरीकाक्षः पुनात्वित्युच्चार्य्य श्राद्धदेशं द्रव्याण्यात्मानं च सिंचेत् ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतो षोडशश्राद्धान्तर्गतोनमासिकश्राद्धमहं करिष्ये इति संकल्पं कुर्यात् ॥ ततो देवताभ्यः पितृभ्यश्चेति पठेत् ॥ ततोऽपसव्येन कुशादीन्यादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्योनमासिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति कुशरूपमासनमुत्सृजेत् ॥ ततः अपहताऽसुरा रक्षाꣳसि व्वेदिषदः इति वामावर्त्तेन तिलान् श्राद्धदेशे विकिरेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततःपुटकादौ पवित्रेस्थ इति मन्त्रेण दक्षिणाग्रं पवित्रं धृत्वा ॥ शन्नोदेवीति मन्त्रेण तत्र जलं क्षिपेत् ॥ तिलोऽसीति मन्त्रेण तिलान् प्रक्षिप्य ॥ गंधद्वारामिति मंत्रेण गन्धम् ॥ श्रीश्चतेति मंत्रेण पुष्पं क्षिपेत् ॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं नमो नारायणायेति मंत्रेणान्नपात्रोपरि उत्तराग्रं धृत्वा ॥ या दिव्या इति मंत्रेण पात्रान्तस्थजलमभिमंत्र्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिदकश्राद्धे एष हस्तार्घहस्ते मया दीयते तवोपतिष्ठतामिति पवित्रोपरि अर्घजलं ददुत्सृजेत् ॥ ततः पवित्रादि सहितमघपात्रं आसनवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेवस्थापयेत् ॥ ततो गन्धादिना संपूज्य कुशादीन्यादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिक श्राद्धे एतानि गन्धपुष्पाक्षतधूपदीपनैवेद्यवासांसि ते मया दीयंते तवोपतिष्ठन्तामिति गंधादिकमुत्सृजेत् ॥ ततः आसनस्यान्नपात्रासहितस्य चतुर्दिक्षु चतुरस्रं मण्डलं कृत्वा ॥ श्राद्धीयान्नयभागं घृततिलजलयुतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुटकादौ कृत्वा ॥ इदमन्नमेतद् भूस्वामिपितृभ्यो नमः इत्युत्सृजेत् ॥ ततः पुरुषतृप्तिञ्चममन्नं सोपस्करणमुपनीय सतिलजलश्चान्नं चोपनीय अन्नं मधुनाभिघार्य्य ॥ पात्रालंभनाङ्गुष्ठावगाहनं विना ॥ पृथिवी ते पात्रं द्यौरपिधानमित्यादि स्वाहान्तं ॥ इद विष्णुरित्यादि सुरे इत्यन्तं मंत्रं पठित्वा ॥ अपहताऽअसुरा रक्षाꣳसि वेदिषदः ॥ इति तिलानन्नोपरि विकीर्य्य कुशादिकमादाय ॥ अद्यामुकगोत्रायामुकप्रेतायोनमासिकश्राद्धे इदमन्नं सोपकरणं ते मया दीयते तवोपतिष्ठयतामित्यन्नमुत्सृजेत् ॥ ततो मधुवाता इति ऋचः मधु मधु मध्विति वदेत् ॥ अन्नहीनमित्यादि मन्त्राः ॥ नमस्तुभ्यं विरूपाक्षेति श्लोकं पठेत् ॥ अत्र विकिरो रेखाकरणमुल्मुकभ्रमणं च न भवति ॥ सव्यं कृत्वाचम्यऽपसव्यं कृत्वा पिण्डस्थानोपरि छिन्नमूलकुशान् दक्षिणाग्रानास्तीर्य्य ॥ तिलजलगन्धयुतं पुटकं वामहस्ते कृत्वा ॥ कुशादिकमादाय अद्यामुकगोत्रामुकप्रेतोनमासिपिण्डक श्राद्धे स्थाने इदमवनेजनं ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशादिकसहितंपिण्डमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठतामित्यवनेजनस्थाने पिण्डं दद्यात् ॥ ततो दर्भमूलेन करं प्रोक्ष्य ॥ सव्यं कृत्वाऽऽचम्याऽपसव्यं कृत्वा ॥ मन्त्रपाठं विना तूष्णीं भास्करमूर्तिं प्रेतं ध्यायेत् ॥ ततोऽवनेजनपात्रं वामहस्ते कृत्वा कुशादिकं गृहीत्वा ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं पिण्डोपरि दद्यात् ॥ ततो नीवीं विस्रंस्य ॥ सव्यंकृत्वाऽऽचम्याऽपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां पिण्डोपरि प्रेतैतत्ते वास इति सूत्रं धृत्वा ॥ गन्धादिभिः पिण्डं समभ्यर्च्य कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धपिण्डे एतानि सूत्रगन्धपुष्पाक्षतधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामित्युत्सृजेत् ॥ ततः पिण्डशेषान्नं पिण्डसमीपे विकीर्य ॥ शिवा आपः सन्तु इति जलं। सौमनस्यमस्तु इति पुष्पं। अक्षतञ्चारिष्टमस्त्विति तण्डुलान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्नपात्रोपरि क्षिपेत् ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्योनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यच्चय्योदकं दत्त्वा सव्यंकृत्वा ॥ अघोरः प्रेतोऽस्तु इति दक्षिणां दिशं पश्यन्पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ॥ अत्राशीः प्रार्थननं भवति ॥ ततः पिण्डोपरि सपवित्रान् कुशान्धृत्वा ॥ पुटकस्थजलादिना मन्त्रपाठं विना । इदमूर्ज्जं ते मया दीयते तवोपतिष्ठतामिति सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात् ॥ ततः पिण्डमाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशान् वह्नौ क्षिपेत् ॥ अर्घपात्रं संचाल्य ॥ सव्यंकृत्वा कुशादिकमादाय अद्यामुकगोत्रस्यामुकप्रेतस्य कृतैतदूनमासिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ ततो देवताभ्याः इति वारत्रयं पठेत् ॥ ततोऽपसव्यं कृत्वा दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाऽऽचम्य प्रमादादित्यादि पठित्वा विष्णुं स्मृत्वा । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् ॥ एवमेव द्वितीयमासिक,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्मृत्वा । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् ॥ एवमेव द्वितीयमासिक,

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

त्रैपाक्षिक, तृतीयमासिक, चतुर्थमासिक, पंचममासिक, षष्ठमासिक, उनषाण्मासिक, सप्तममासिक, अष्टममासिक, नवममासिक, दशममासिक, एकादशमासिक, द्वादशमासिक, उनाब्दिक श्राद्धेषु तत्तत्पदप्रक्षेपेण प्रयोग ऊह्यः ॥

यदि मरणदिनादारभ्य द्वादशमासमध्ये अधिकमासपातस्तदा तन्मासिकं द्विवारं कार्य्यम् ॥ आद्यमासिकातिरिक्तानि उनमासिकादीनि कालैक्यात्कर्तैक्याद्दैवतैक्याच्च तन्त्रेणापि भवन्तीति सोऽपि प्रयोगो लिख्यते ॥

तत्रः क्रमः ॥ श्राद्धदेशं श्राद्धीयवस्तून्यासाद्य दीपं प्रज्वाल्य ॥ कर्ता पूर्वाभिमुख उपविश्य कुशमूलेन ॥ अपवित्रः पवित्रोवेत्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत् ॥ तत्कुशादिकमादाय । अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतोःषोडशश्राद्धान्तर्गतोनमासिक, द्वितीयमासिक, त्रैपाक्षिक, तृतीयमासिक चतुर्थ, मासिक पंचम, मासिक षष्ठमासिक, उनषाण्मासिक, सप्तममासिक, अष्टममासिक, नवममासिक, दशममासिक, एकादशमासिक, द्वादशमासिक, उनाब्दिकमासिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्नपात्रोपरि क्षिपेत् ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्योनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यच्चय्योदकं दत्वा सव्यंकृत्वा ॥ अघोरः प्रेतोऽस्तु इति दक्षिणां दिशं पश्यन्पिण्डोपरि पूर्वाग्रां जलधारां दद्यात् ॥ अत्राशीः प्रार्थननं भवति ॥ ततः पिण्डोपरि सपवित्रान् कुशान्धृत्वा ॥ पुटकस्थजलादिना मन्त्रपाठं विना । इदमूर्ज्जं ते मया दीयते तवोपतिष्ठतामिति सपवित्रकुशोपरि दक्षिणाग्रां जलधारां दद्यात् ॥ ततः पिण्डमाघ्रायोत्थापयेत् ॥ पिण्डाधारकुशान् वह्नौ क्षिपेत् ॥ अर्घपात्रं संचाल्य ॥ सव्यंकृत्वा कुशादिकमादाय अद्यामुकगोत्रस्यामुकप्रेतस्य कृतैतदूनमासिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ ततो देवताभ्याः इति वारत्रयं पठेत् ॥ ततोऽपसव्यं कृत्वा दीपमाच्छाद्य हस्तौ पादौ प्रक्षाल्य सव्येनाऽऽचम्य प्रमादादित्यादि पठित्वा विष्णुं स्मृत्वा । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् ॥ एवमेव द्वितीयमासिक,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्मृत्वा । श्राद्धीयवस्तूनि ब्राह्मणाय प्रतिपादयेत् ॥ एवमेव द्वितीयमासिक,

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रैपाक्षिक, तृतीयमासिक, चतुर्थमासिक, पंचममासिक, षष्ठमासिक, उनषाण्मासिक, सप्तममासिक, अष्टममासिक, नवममासिक, दशममासिक, एकादशमासिक, द्वादशमासिक, उनाब्दिक श्राद्धेषु तत्तत्पदप्रक्षेपेण प्रयोग ऊह्यः ॥

यदि मरणदिनादारभ्य द्वादशमासमध्ये अधिकमासपातस्तदा तन्मासिकं द्विवारं कार्य्यम् ॥ आद्यमासिकातिरिक्तानि उनमासिकादीनि कालैक्यात्कर्तैक्याद्दैवतैक्याच्च तन्त्रेणापि भवन्तीति सोऽपि प्रयोगो लिख्यते ॥

तत्रः क्रमः ॥ श्राद्धदेशं श्राद्धीयवस्तून्यासाद्य दीपं प्रज्वाल्य ॥ कर्ता पूर्वाभिमुख उपविश्य कुशमूलेन ॥ अपवित्रः पवित्रोवेत्यादि पठित्वा पुण्डरीकाक्षः पुनात्विति श्राद्धदेशं द्रव्याण्यात्मानं च सिञ्चेत् ॥ तत्कुशादिकमादाय । अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्त्युत्तमलोकप्राप्तिहेतोःषोडशश्राद्धान्तर्गतोत्तमासिक, द्वितीयमासिक, त्रैपाक्षिक, तृतीयमासिक चतुर्थ, मासिक पंचम, मासिक षष्ठमासिक, उनषाण्मासिक, सप्तममासिक, अष्टममासिक, नवममासिक, दशममासिक, एकादशमासिक, द्वादशमासिक, उनाब्दिकमासिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धानि तन्त्रेणैकोद्दिष्टविधिना एकादशे द्वादशे वा अहं करिष्ये इति संकल्पं कुर्यात् ॥ अधिकमासपाते षोडशपदस्थाने सप्तदशपदं योज्यम् ॥ अधिकमासिकेति पदं प्रक्षिप्य वाक्येन कर्त्तव्यम् ॥ ततो देवताभ्यः इति त्रिः पठेत् ॥ ततोऽपसव्येन कुशतिलजलान्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्योनमासिकश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति कल्पासनेषु क्रमेण तत्तत्पदप्रक्षेपेण वाक्यंकृत्वा कुशरूपाण्यासनानि दद्यात् ॥ ततः अपहता असुरा रक्षाꣳसि वेदिषद इति वामावर्त्तेन तिलान् श्राद्धदेशे विकिरेत् ॥ ततः क्रमेण पुटकादीनि संस्थाप्य ॥ तत्र पवित्रेस्थ इत्यादि मन्त्रेण प्रत्येकं क्रमेण दक्षिणाग्राणि पवित्राणि धृत्वा जलतिलगन्धपुष्पाणि स्व स्व मन्त्रेण प्रत्येकं क्रमेण क्षिपेत् । ततः उनमासिकार्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं नमो नारायणेति मन्त्रेणान्नपात्रोपरि उत्तराग्रं धृत्वा । या दिव्या० इति मन्त्रणार्घपात्रस्थजलमभिमंत्र्य कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitized by eGangotri. Funding: MoE-IKS

अर्घजलं ददद्युत्सृज्य ॥ एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण हस्तार्घमुत्सृजेत् ॥ ततः पवित्रादिसहितान्यर्घपात्राणि क्रमेण प्रत्येकमासनवामपार्श्वे प्रेताय स्थानमसीति उत्तानमेव स्थापयित्वा ॥ तदुपरि कुशान् दद्यात् ॥ ततो गन्धपुष्पादिना क्रमेण प्रत्येकं संपूज्य ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिक-द्वितीयमासिक-त्रैपाक्षिक-तृतीयमासिक-चतुर्थमासिक-पंचममासिक-षष्ठमासिक-उनषाण्मासिक-सप्तमासिक अष्टममासिक, नवममासिक-दशममासिक-एकादशमासिक-द्वादशमासिक-उनाब्दिकमासिकश्राद्धेषु एतानि गन्धपुष्पधूपदीपवासांसि ते मया दीयन्ते तवोपतिष्ठन्तामिति गन्धादिकमुत्सृजेत् ॥ ततः क्रमेण प्रत्येकं आसनसहितानामन्नापात्राणां चतुर्दिक्षु चतुरस्राणि मण्डलानि कृत्वा श्राद्धीयान्नाग्रभागं घृततिलजलयुतपुटकादौ कृत्वा एकत्रैव इदमन्नमेतद्भूस्वामिपितृभ्यो नम इत्युत्सृजेत् ॥ ततःपुरुषतृप्तिक्षमं सोपस्करणमन्नं तिलजलं च क्रमेण प्रत्येकमुपनीय अन्नं मधुनाभिघार्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पात्रालम्भनाङ्गुष्ठावगाहनं विना। पृथिवी ते पात्रं द्यौरपि धानमित्यादि स्वाहान्तम् ॥ इदं विष्णुरित्यादि सुरेत्यन्तं च पठित्वा ॥ अपहता असुरा हत्वाऽंसि वेदिषद इति तिलानन्नोपरि विकीर्य्य। कुशादिकमादाय अद्यामुकगोत्रायामुकप्रेतायोनमासिकश्राद्धे इदमन्नं सोपस्करं ते मया दीयते तवोपतिष्ठतामित्यन्नमुत्सृज्य। एवं क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणान्नान्युत्सृजेत् ॥ ततो मधुव्वाता इति ऋचं मधु मधु मध्विति च पठेत् ॥ अन्नहीनमित्यादि मन्त्रम् ॥ नमस्तुभ्यं विरूपाक्ष नमस्तेऽनेकचक्षुषे ॥ नमः पिनाकहस्ताय वज्रहस्ताय वै नमः ॥ इति पठेत् ॥ अत्र विकिरदानं रेखाकरणं उल्मुकभ्रमणं च न भवति ॥ सव्यंकृत्वाऽऽचम्याऽपसव्यं कृत्वा पश्चिमतः क्रमेण प्रत्येकं पिण्डस्थानोपरि च्छिन्नमूलान् कुशान् दक्षिणाग्रानास्तीर्य्य। तिलजलगन्धयुत पुटकादिकवामहस्ते कृत्वा कुशादिकमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धे इदमवनेजनं ते मया दीयते तवोपतिष्ठतामिति अवनेजनं सर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सिकश्राद्धे इदमवनेजनं ते मया दीयते तवोपतिष्ठतामिति अवनेजन सर्व
CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

पश्चिमास्तृतकुशोपरि दत्वा ॥ एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेणावने जनानि दद्यात् ॥ ततस्तिलघृतमधुयुक्तेनान्नेन नारिकेलप्रमाणान् पिण्डान् कृत्वा कुशादिसहितप्रथमपिण्डमादाय ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठतामिति सर्वपश्चिमावनेजनस्थाने पिण्डं दत्वा, एवमेव क्रमेण प्रत्येकं तत्तत्पदप्रक्षेपेण द्वितीयादि पिण्डान्दद्यात् ॥ ततो दर्भ-मूलेन करं प्रोक्ष्य ॥ सव्यं कृत्वाऽऽचम्य हरिं स्मृत्वाऽपसव्यं कृत्वा कुशादिकं गृहीत्वा ॥ अद्यामुकगोत्रामुकप्रेतोनमासिकश्राद्धपिण्डे इदमवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रथमपिण्डे अवनेजनं दत्वा ॥ एवमेव क्रमेण प्रत्येकं द्वितीयादि पिण्डेषु तत्तत्पदप्रक्षेपेण प्रत्यवनेजनं दद्यात् ॥ ततो नीवीं विस्रंस्य । सव्यंकृत्वाऽऽचम्याऽपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां हस्ताभ्यां प्रथमपिण्डोपरि प्रेतैतत्ते वास इति सूत्रं दत्वा ॥ एवं द्वितीयादि पिण्डेष्वपि प्रत्येकं सूत्रं दद्यात् ॥ गन्धादिनाक्रमेण पिण्डानभ्यर्च्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशादिकमादाय अद्यामुकगोत्रामुकप्रेतोनमासिक-द्वितीयमासिक-त्रैपाक्षिक, तृतीयमासिक–चतुर्थमासिक-पंचममासिक-षष्ठमासिकोनषाण्मासिक-सप्तममासिकोऽअष्टममासिक-नवममासिक दशममासिक एकादशमासिक-द्वादशमासिकोनाब्दिकश्राद्धपिण्डेपु एतानि गन्धपुष्पधूपदीपनैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामित्युत्सृजेत् ॥ ततः पिण्डशेषान्नंपिण्डसमीपे विकीर्य्य । शिवा आपःसन्तु इति जलं । सौमनस्यमस्त्विति पुष्पं । अक्षतं चारिष्टमस्त्विति तण्डुलान क्रमेण प्रत्येकं अन्नपात्रोपरि क्षिपेत् ॥ कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्योनमासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यक्षय्योदकं दत्वा ॥ एवमेव क्रमेण तत्तत्पदप्रक्षेपेणाऽक्षय्योदकं दद्यात् ॥ सव्यं कृत्वा अघोरः प्रेतोऽस्तु इति उच्चार्य्य दक्षिणांदिशं पश्यन्सर्वेषु पिण्डेषु पूर्वाग्रामेकां जलधारां दद्यात् ॥ अत्राशीः प्रार्थना निषेधः ॥ ततः अपसव्यंकृत्वा सर्वेषु पिण्डेषु क्रमेण सपवित्रान् कुशान् धृत्वा पुटकादिस्थजलादिना मन्त्रपाठं

Nepal Sanskrit University, Balmiki Campus, Kathmandu

सर्वेषु पिण्डेषु क्रमेण सपवित्रान् कुशान् धृत्वा पुटकादिस्थजलादिना मन्त्रपाठ
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विना, इदमूर्ज्जन्ते मया दीयते तवोपतिष्ठतामिति प्रथमपिण्डस्थसपवित्रकुशोपरि दक्षिणाग्रां जलधारां दत्वा ॥ ततः पिण्डानाघ्रायोत्थापयेत् । पिण्डाधारकुशान् वह्नौ क्षिपेत् ॥ अर्घपात्राणि संवाल्य ॥ सव्यं कृत्वाऽऽचम्यदक्षिणाद्रव्यसहितं कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य कृतैतदूनमासिकद्वितीय त्रैपाक्षिक तृतीयमासिक-चतुर्थमासिक पंचममासिक-षष्ठमासिक-उनषाण्मासिक,सप्तममासिक-अष्टममासिक-नवममासिक,दशममासिकएकादशमासिक—द्वादशमासिकोनब्दिकश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथा यथा नामगोत्रेभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ ततो देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च इत्यादि त्रिवारं पठेत् ॥ ततोऽपसव्यं कृत्वा दीपाच्छादनं विधाय हस्तौ पादौ प्रक्षाल्याचम्य ॥ श्राद्धसंपूर्णताकामः ॥ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिरिति पठित्वा विष्णुं स्मरेत् ॥ श्राद्धीयवस्तूनि ब्राह्मणेभ्यः प्रतिपादयेत् ॥ इतिषोडशश्राद्धांतर्गतोनमासिकादीनां पञ्चदशानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धानां तन्त्रेणापात्रकप्रयोगः ।

अथ सपिण्डीकरणेति कर्त्तव्यता तत्र मातृविषये शंखः ॥ मातृः सपिण्डीकरणं कथं कार्यं भवेत् सुतैः ॥ पितामह्यादिभिः सार्द्धं सपिण्डीकरणं स्मृतम् ॥ कारिकायाम् ॥ पितामह्यादिभिः सार्द्धं मातरं तु सपिण्डयेत् ॥ सहगमने यमः । पत्या चैकेन कर्त्तव्यं सपिण्डकरणं स्त्रियाः ॥ हारितोपि ॥ स्वेन भर्त्रा स हैवास्याःसपिण्डीकरणं स्त्रियाः । यकत्वमागता यस्माच्चरुमन्त्राहुतिव्रतैः ॥ पत्नीविषये पैठिनसिः ॥ अपुत्रायां मृतायां तु पतिः कुर्यात् सपिण्डताम् । श्वश्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत् ॥ पुत्रिकापुत्रकर्तृके सपिण्डने मनुः ॥ मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिका सुतः ॥ द्वितीयं तु पितुस्तस्यास्तृतीयन्तु पितुः पितुः ॥ पतिपुत्ररहितायाः स्त्रियाःसपिण्डनमेव निषिद्धं किंतु षोडशश्राद्धान्येन भवन्ति ॥ तथा च मार्कण्डेयः ॥ स्त्रीणामप्येवमेवैतदेकोद्दिष्टं विधीयते । सपिण्डीकरणं तासां पुत्रभावे न विद्यते ॥ पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः ॥ पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये ॥ अत्र पुत्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाव इत्युपलक्षणम् ॥ पतिपुत्रा भावे द्रव्यः ॥ पतिकर्तृकस्य सपिण्डस्य विधानात् ॥ एवं सपत्नीपुत्रेऽपि विद्यमाने स्त्रियाः सपिण्डनं भवति ॥ बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् । सर्वास्तेनैव पुत्रेण पुत्रिण्यो मनुरब्रवीदिति ॥ अपुत्रायाः सपत्न्या पुत्रिणीत्यतिदेशात् ॥ पितुः सपिण्डनं पितामहादिभिः सह कुर्यात् ॥ व्युत्क्रममृते तु सपिण्डीकरणम् ॥ ब्रह्मपुराणे ॥ मृते पितरि यस्याथ विद्यते च पितामहः ॥ तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः ॥ तेभ्यश्च पैतृकः पिण्डो नियोक्तव्यश्च पूर्ववत् ॥ मातर्यग्रे मृतायां तु विद्यते च पितामही ॥ प्रपितामहीपूर्वं तु कार्यस्तत्राप्ययं विधिः ॥ एवं च जीवंतमतिक्रम्य त्रिकपूरणं कर्तव्यम् ॥ व्युत्क्रमाच्च प्रमीतानां नैव कार्य्या सपिण्डताइति च मातृपितृभर्त्रतिरिक्तविषयम् ॥ अतएव स्कांदे ॥ व्युत्क्रमेण मृतानां न सपिण्डीकृतिरिष्यते ॥ यदि माता यदि पिता भर्त्ता नैष विधिः स्मृतः ॥ एष विधिः सपिण्डननिषेधरूपः ॥ पतिविषये उशनाः ॥ सपिण्डीकरणं तेषां न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्तव्यं सुतादिभिः ॥ त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते ॥ शूद्रस्य तु विष्णुः ॥ मन्त्रवर्जं हि शूद्राणां द्वादशेऽहनि कीर्तितम् ॥ अमावस्याश्राद्धकारि शूद्र-विषयमेतदपरार्के कल्पतरौ च ॥ यत्तु कात्यायनः ॥ सर्वेषामेव वर्णानामाशौ-चान्ते सपिण्डनमिति देव्यतिरिक्तविषयम् ॥ त्रैवर्णिकजातस्य शूद्रस्यतु-शंखेन लिख्यते । नो यतेस्तु सपिण्डत्वं येषां शूद्रकुलोद्भवः ॥ सर्वे शूद्रत्व मायान्ति यदि स्वर्गजितोपितम् ॥ सपिण्डीकरणे ज्येष्ठपुत्रस्यैवाधिकारः ॥ तथा च वायुपुराणे ॥ श्राद्धानि षोडशं दत्वा न तु कुर्यात्सपिण्डनम् ॥ प्रोषितावसते पुत्राः कालादपि चिरादपि । यदि षोडश श्राद्धानि कनिष्ठभ्रात्रा-दिना कृतानि तदा ज्येष्ठः सपिण्डनमेव कुर्य्यात् इत्यपरार्के ॥ इदं वसति ज्येष्ठे तदभावे कनिष्ठेन ॥ तदभावे भ्रात्राद्यधिकारिभिः पुरुषस्य सपिण्डनं कार्यम् ॥ भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा ॥ सपिंडीकरणं कुर्यात् पुत्रहीने मृतेसति ॥ इति मनुवचनात् ॥ तथा ज्येष्ठेन वा कनिष्ठेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

सपिंडीकरणे कृते ॥ देशान्तरगतानां च पुत्राणां च कथं भवेत् ॥ श्रुत्वा तु वपनं कार्यं दशाहान्नं तिलोदकम् ॥ सपिण्डीकरणं कुर्य्यात्तद्वदेकादशेऽहनि ॥ द्वादशाहेन कर्त्तव्यमिति भ्रात्रा यथाऽब्रवीत् ॥ स्मृत्यर्थसारेतु ब्रह्मचारिणां अनपत्यानां च सपिण्डनं नास्ति तेषां सदैकोद्दिष्टमेव । व्युत्क्रमस्मृतानां व्यवहितं सपिण्डनं कार्यं न वा केचित्सर्वं सपिण्डनमाहुः ॥ यतीनां प्रेतत्वं नास्ति अतस्तेषां नैकोद्दिष्ट न सपिण्डीकरणं किन्त्वेकादशेऽहनि पार्वणं कार्यम् ॥ दंडग्रहणात्पूर्वं मृते दाहादिसपिण्डनान्तं सर्वं कार्यं भवति ॥ एकाहाशौचे द्वादशेऽहनि तृतीयेऽहनि वा ॥ त्र्यहाशौचे पञ्चमेऽह्नि सपिण्डनं कार्यम् ॥ तच्च ॥ सपिण्डनमनेककालत्वेऽपि कलौ द्वादशाहे कार्य्यम् ॥ आनन्त्यात्कुलधर्माणां पुंसां चैवायुषःक्षयात् ॥ अनित्यत्वाच्छरीरस्य द्वादशाहे प्रशस्यते इति वचनात् ॥ गोभिलः ॥ द्वादशाहादिकालेषु प्रमादादावनुश्रितम् ॥ सपिण्डीकरणं कुर्यात्कालेषूत्तरभाविषु ॥ उत्तर भाविषु त्रिपक्षादिषु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ते च काला भविष्यपुराणे उक्ताः ॥ सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् ॥ अनाहिताग्नेः प्रेतस्य पूर्णाब्दे भरतर्षभ । द्वादशेऽहनि षष्ठे वा त्रिपक्षे वात्रिमासि वा ॥ एकादशेऽपि वा मासि मङ्गलस्यादुपस्थितम् ॥ षष्ठेमासीत्यन्वयः ॥ यदा मङ्गलं वृद्ध्याद्युपस्थितं स्यात्तत: पूर्वमपि कालमिच्छन्ति ॥

अथ सपिण्डीकरणप्रयोगः ॥ सपिण्डीकरणे बहुधा अपात्रकमेवाचरन्तीति अपात्रक प्रयोग एव लिख्यते ॥ तत्र मध्यान्हे कर्त्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितंस्थापितगौरस्त्रर्षपादिरक्षोघ्नं श्राद्धदेशं गत्वा पूर्वाभिमुखंउपविश्य ॥ रक्षोघ्नदीपं प्रज्वाल्य । सव्येन ॐ यद्देवा देवहेडनमिति कण्डिकात्रयेण कर्म्मपात्रं कृत्वा कुशत्रयसहितं कर्मपत्रोदकमादाय ॥ ॐ अपवित्रः पवित्रो वेत्यादि पठित्वा ॥ ॐ पुण्डरीकाक्षः पुनात्वित्युक्त्वा श्राद्धदेशं द्रव्याण्यात्मानं च सिंचेत् ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थममुकगोत्रैरस्मत्पितामहप्रपितामहवृद्धप्रपितामहैरमुकामुकशर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भिः वसुरुद्रादित्यस्वरूपैः सहकालकामविश्वेदेवपूर्वकं सपिण्डीकरणं मृताहाद् द्वादशाहे पार्वणैकोद्दिष्टविधिनाहं करिष्ये इति संकल्पं कुर्य्यात् ॥ मातुः सपिण्डीकरणे तु ॥ अद्यामुकगोत्राया मातुरमुकप्रेतायाः प्रेतत्वनिवृत्ति-पितृलोकप्राप्त्यर्थममुकगोत्राभिरस्मत्पितामहीप्रपितामहीवृद्धप्रपितामहीभिरमुका-मुकदेवीभिर्वसुरुद्रादित्यस्वरूपाभिः सहेत्यादि पूर्ववत् ॥ भ्रात्रादीनां सपिण्डीकरणे ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वनिवृत्तिपितृलोकप्राप्त्यर्थ-ममुकगोत्रैः स्वपितृपितामहप्रपितामहैरमुकामुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः सहे-त्यादि पूर्ववत् ॥ सहगमने तु ॥ अद्यामुकगोत्राया मातुरमुकप्रेतायाः प्रेतत्वानिवृत्तिपितृलोकप्राप्त्यर्थममुकगोत्रेण स्वभर्ता सह सपिण्डीकरणं मृता-हाद् द्वादशाहेऽहं करिष्ये इति विशेषः ॥ ततः त्रिः प्रणवव्याहृतिसहितां गायत्रीं जपेत् ॥ ततो देवताभ्यः इति त्रिः पठेत् ॥ ततो देवश्राद्धार्थोपकल्पि-तासनादि देशमागत्य सव्येनैव उदङ्मुख उपविश्य कुशादीन्यादाय ॥ ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामह-वृद्धप्रपितामहसुरुद्रादित्यस्वरूपाणांश्राद्धसंबन्धिनांमकालकामविश्वेषां देवानां इदमासनं वो नम इति पूर्वाग्रंकुशरूपमासनं यवजलप्रोक्षितमुत्सृजेत् ॥ ॐ विश्वान् देवानामावाहयिष्ये इत्युक्त्वा ॐ विश्वे देवास इति मन्त्रेणावाह्य ॥ ॐ यवोसि यवयास्म द्वेषो यवयारातीः इति मंत्रेणश्राद्धदेशे यवान् विकीर्य्य ॥ ॐ विश्वेदेवाः शृणुतेममित्यादि बर्हिषिमादयध्वमित्यन्तं पठित्वा ॥ ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ॥ ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते इति पठेत् ॥ ततः स्वमन्त्रेण पवित्रं पुटकादौ पूर्वाग्रं धृत्वा जलयवगन्धपुष्पाणि स्वस्वमन्त्रैः क्षिपेत् ॥ ततोः अर्घपात्रं वामहस्ते कृत्वा पुष्पसहितं पवित्रं ॐ नमो नारायणायेति मंत्रेण अन्नपात्रे पूर्वाग्रं धृत्वा ॥ ॐ या दिव्या इत्यादिना अर्घपात्रस्थजलमभिमन्त्र्य कुशयवजलान्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपिता-

Nepal Sanskrit University, Bamdeki Campus, Kathmandu

अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामह-
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महवृद्धप्रपितामहामुकामुकशर्म्मवसुरुद्रादित्यस्वरूपश्राद्धसंबंधिनः कालकामविश्वेदेवा एष हस्तार्घो वो नम इति पवित्रोपरि अर्घजलं ददद्दुत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रमासनदक्षिणपार्श्वे कालकामविश्वेभ्यो देवेभ्यः स्थानमसीति देवार्घपात्रं उत्तानं स्थापयेत् ॥ ततो गंधादिभिः संपूज्य कुशादिकमादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मवसुरुद्रादित्यस्वरूपश्राद्धसंबंधिनः कालकामविश्वेदेवा एतानि गंधपुष्पधूपदीपवासांसि वो नम इति गंधादिकमुत्सृजेत् ॥ ततोऽपसव्येन तिलघृतजलयुतमन्नं मोटकादिसहितमादाय दक्षिणाभिमुखः ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः इत्युत्सृजेत् ॥ ततः सव्यं कृत्वा आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु चतुष्कोणं मण्डलं विधाय देवान्ध्यायन्सोपस्करं तिलजलयुतमन्नमुपनीय अन्नं मधुनाभिघार्य ऋजुहस्ताभ्यामन्नपात्रमालभ्य ॥ ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमृतं जुहोमि स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पा छं सुरे स्वाहा इति पठित्वा ॥ ॐ इदमन्नमित्यन्ने ॥ ॐ इमा आप इतिजले ॥ ॐ इदमाज्यं इति घृते ॥ ॐ इदं हविरिति पुनरन्ने दक्षिणकराङ्गुष्ठं निवेश्य ॥ ॐ यवोसि यवयास्म द्वेषो यवयारातीरिति मन्त्रेण यवानन्नोपरि प्रक्षिप्य कुशयवजलान्यादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मवसुरुद्रादित्यस्वरूपेभ्यःश्राद्धसम्बन्धिभ्यः कालकामविश्वेभ्यो देवेभ्यः एतद्धोऽन्नं सोपस्करणं नम इत्यन्नमुत्सृजेत् ॥ एवं देवकाण्डं श्राद्धं निवर्त्य हस्तौ पादौ प्रक्षाल्याऽचम्य प्रेतश्राद्धदेशमागत्योपविश्य कृतापसव्यो दक्षिणाभिमुखः कर्मपात्रं कृत्वा कुशादीन्यादाय अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति कुशरूपमासनमुत्सृजेत् ॥ ततो पितृश्राद्धदेशमागत्य विधिवत्कर्मपात्रंकृत्वा मोटकादिकमादाय ॐ अद्यामुक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोत्रस्यामुकप्रेतस्यसपिण्डीकरणनिमित्तकश्राद्धेअमुकगोत्रस्य पितामहस्यामुकशर्मणो वसुस्वरूपस्येदमासनं ते स्वधा इति स्थानत्रयेषु क्लृप्तासनेषु सव्वपश्चिमाश्रितस्थानस्थितेआसने मोटकरूपमासनमुत्सृजेत् ॥ पुनर्मोटकादिकमादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुक गोत्रस्य प्रपितामहस्यामुकशर्मणो रुद्रस्वरूपस्य इदमासनं ते स्वधा इति दत्तासने पूर्वप्रपितामहाय मोटकरूपमासनमुत्सृज्य पुनर्मोटकादिकमादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रस्य वृद्ध प्रपितामहस्यामुकशर्मणो आदित्यस्वरूपस्य इदमासनं ते स्वधा इति सर्व पूर्वं वृद्धप्रपितामहाय मोटकरूपमासनमुत्सृजेत् ॥ ततः प्रेतवर्ज्यं पितामहादीनुद्दिश्य पितृनावाहयिष्ये ॥ इत्युक्त्वा ॐ उशंतस्त्वा निधी मह्युशंतः समिधीमहि ॥ उशन्नु शतऽआवह पितॄन् हविषेऽअत्तवे ॥ इति पितामहादीनावाह्य ॥ ॐ अपहता असुरारक्षाꣳसि वेदिषद इति श्राद्धस्थाने तिलान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकीर्य ।। ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ॥ अस्मिन्यज्ञेस्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्मान् इति मन्त्रं जपेत् ।। ततोऽर्घार्थं पूर्वभागे एकं पुटकमासाद्य तत्पश्चिमभागे दक्षिणसंस्थं पुटकपात्रत्रायमासाद्य तेषु चतुष्टयेषु पवित्रोस्थ इति मंत्रेण प्रत्येकं दक्षिणाग्राणि पवित्राणि धृत्वा जलतिलगंधपुष्पाणि स्वस्वमन्त्रैः प्रत्येकं तेषु क्षिपेत् ।। ततः प्रेतार्घपात्रं वामहस्ते कृत्वा नमो नारायणायेति मंत्रेणान्नपात्रोपरि पवित्रं उत्तराग्रं धृत्वा । या दिव्या ऽआप इत्यादिमंत्रेणार्घपात्रस्थजलं दक्षिणहस्तेनाच्छादितमभिमंत्र्य कुशादिकमादाय अद्यामुकगोत्रामुकप्रेतसपिण्डीकरणश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवित्रोपरि चतुर्भागजलं ददद्युत्सृजेत् ।। ॐ अद्यामुकगोत्रअमुकप्रेतार्घपात्रोदकम् अमुकगोत्राणां पितामहप्रपितामहवृद्धप्रपितामहानाममुकामुकशर्मणामर्घपात्रोदकेन संयोजयिष्ये इत्युक्त्वा पितामहादिपात्रत्राये प्रेतार्घपात्रजलस्य भागत्रयं कृत्वा एकैकं भागं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्ष्यमाणमन्त्रैः संयोजयेत् ॥ प्रेतार्घपात्रजलविभागे ये समाना इति मन्त्रद्वय-पाठः । निरूप्य चतुरः पिण्डान् श्राद्धदः प्रतिनामतः ॥ ये समाना इति द्वाभ्यामाद्यंतु विभजेत्त्रिधा ॥ एष एव विधिः प्रोक्त अर्घपात्रचतुष्टये इति वचनात् ॥ मिताक्षरायां स्मृत्यर्थसारे च ॥ प्रेतार्घपात्रजलमादौ पिता-महार्घपात्रे संयोज्याविशिष्ट जलेन प्रेतार्घं दद्यादित्युक्तम् ॥ तत्र क्रमः ॥ सव्यं कृत्वाऽऽचम्याऽपसव्यं कृत्वा अन्यत् पुटकत्रयमग्रे धृत्वा प्रतार्घपात्रं गृहीत्वा ॥ ये समानाः समनसः पितरो यमराज्ज्ये ॥ तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्प्पताम् ॥ ये समानाः समनसो जीवाजीवेषु मामकाः तेषाञ्श्रीर्मयि कल्पतामस्मिल्लोके शतꣳसमाः ॥ इति मंत्रौ पठित्वा प्रेता-र्घपात्रस्थलं तृतीयभागं पुटकान्तरे धृत्वा पुनरपि मंत्रद्वयं पठित्वा अपर-तृतीयभागं पुटकान्तरे धृत्वा पुनरपि मंत्रद्वयं पठित्वा प्रेतार्घपात्रावशिष्ट-तृतीयभागजलं पुटकान्तरे धृत्वा प्रथमपुटकस्य विभक्तजलतृतीयभागं प्रेतार्घ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पात्रे कृत्वा पवित्रपुष्पसहितं प्रेतार्घमादाय ॐ ये समानाः समनसो जीवाजीवेषु मामकाः ॥ तेषाꣳश्रीमयिकल्पतामस्मिँल्लोके शतꣳसमाः ॥ संसृजंतु त्वा पृथिवी वायुरग्निः प्रजापतिः ॥ संसृजध्वं च पूर्वेभिस्त्रिभिश्च पितृभिः सह ॥ संगच्छध्वं संवदध्वं संवो मनांसि जानताम् ॥ देवा भागं यथा पूर्वे संजानानामुपासते ॥ समानो मंत्रः समिति समानो समानं मनः सह चित्तमेषां समानमन्त्रमभिमन्त्रये वः । समानेन वो हविषा जुहोमि समानीव आकूतिः समाना हृदयानि वः समानवस्तु वो मनो यथा वः सुसहासति ॥ मधु वातेति ऋचमपि पठेदिति केचित् ॥ इति मंत्रान्पठित्वा प्रेतार्घपात्रस्थतृतीयभागजलं पितामहार्घपात्रजले मेलयेत् ॥ एवमपरं पुटकद्वयस्थितार्घपात्रजलं तृतीयभागद्वयं क्रमेण प्रत्येकं मंत्रान् पठित्वा प्रपितामहार्घपात्रजले वृद्धप्रपितामहार्घपात्रजले च क्रमेण मेलयेत् ॥ ततः अमुकगोत्रामुकप्रेतामुकगौत्रैः स्वपितृपितामहप्रपितामहै रमुकामुकशर्मभिर्वसुरुद्रादित्यस्वरूपैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहसायुज्यं गच्छेत्युक्त्वा पितामहार्घपात्रं वामहस्ते कृत्वा ॥ ॐ नमो नारायणायेति मन्त्रेण पवित्रमन्नपात्रोपरि धृत्वा ॥ ॐ या दिव्या आपः पयसेत्यादिना अर्घपात्रस्थजलमभिमंत्र्य मोटकादिकमादाय ॐ अद्यामुक-गोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र पितामहामुक-शर्मन् वसुस्वरूपैष तेऽर्घः स्वधेति पवित्रोपरि अर्घजलं दददुत्सृजेत् ॥ पवित्र-पुष्पसहितमर्घपात्रमग्रे धारयेत् ॥ ततः प्रपितामहार्घपात्रं वामहस्ते कृत्वा ॥ ॐ नमो नारायणेति मन्त्रेणान्नपात्रोपरि धृत्वा ॥ ॐ या दिव्याः आप इत्यादिनार्घपात्रस्थं जलमभिमंत्र्य मोटकादिकमादाय ॥ ॐ अद्यामुक-गोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धे अमुकगोत्रप्रपितामहामुकशर्मन् रुद्र-स्वरूपैष तेऽर्घः स्वधेति पूर्ववदुत्सृजेत् ॥ पवित्रपुष्पसहितमर्घपात्रमग्रे स्थाप-येत् ॥ तृतीयार्घपात्रं वामहस्ते कृत्वा ॐ नमो नारायणायेति पवित्रमन्न-पात्रे धृत्वा ॥ ॐ या दिव्या आपः इत्यादिना अर्घपात्रस्थं जलमभिमंत्र्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोटकादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अद्यामुकगोत्रवृद्धप्रपितामहामुकशर्मन्नादित्यस्वरूपैष तेऽर्घः स्वधेति पूर्ववदर्घमुत्सृजेत् ॥ पवित्रपुष्पसहितमर्घपात्रमग्रे स्थापयेत् ॥ ततः प्रेतार्घपात्रं प्रतासनवामपार्श्वे प्रेताय स्थानमसीत्युत्तानमेव स्थापयित्वा तदुपरि कुशान्दद्यात् ॥ ततः वृद्धप्रपितामहार्घपात्रस्थजलादिकं प्रपितामहार्घपात्रे कृत्वा तत्सर्वं पितामहार्घपात्रे कृत्वा पितामहार्घपात्रं उत्तानं प्रपितामहार्घपात्रोपरि धृत्वा तद्द्वयं उतानैव वृद्धप्रपितामहार्घपात्रोपरि धृत्वा पात्रत्रयमेकदैव पितामहासनवामपार्श्वे पितामहादिभ्यः स्थानमसीति न्युब्जंकृत्वा तदुपरि कुशत्रयं दद्यात् ॥ एवं स्थापितमर्घपात्रचतुष्टयं दक्षिणापर्य्यन्तं न चालयेत् ॥ क्रमेण प्रेतमारभ्य गंधादिभिः सर्वान्संपूज्य ॥ कुशादिकमादाय अद्यामुकगोत्रामुकप्रेतसपिण्डीकरणश्राद्धे एताति गंधपुष्पधूपदीपवासांसि ते मया दीयंते तवोपतिष्ठंतामिति प्रेतायगंधादिकमुत्सृजेत् ॥ पुनर्मोटकादिकमा-

Nepal Sanskrit University, Bhaktaki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहाः अमुकामुकशर्मणो वसुरुद्रादित्यस्वरूपाः एतानि गंधपुष्पधूपदीपवासांसि युष्मभ्यं स्वधा इति पितामहादिभ्यो गन्धादिकमुत्सृजेत् ॥ ततः प्रेतासनस्य चतुर्दिक्षु वामावर्तेन चतुष्कोणंमण्डलं विधाय अपरं पितामहादित्रिकेमण्डलं कुर्य्यात् ॥ ततः सव्यं कृत्वा ॥ प्राङ्मुख उपवीति पातितदक्षिणजानुः पुटकादौ सघृतमन्नं कृत्वा पुटकादिजले ॥ ॐ अग्नये कव्यवाहनाय स्वाहा । इदमग्नये कव्यवाहनाय ॥ ॐ सोमाय पितृमते स्वहा । इदं सोमाय पितृमते ॥ इति आहुतिद्वयं तदन्नाग्रं गृह्णीयात् ॥ अपसव्यंकृत्वा । अवशिष्टमन्नं पितामहादिपात्रे किञ्चित् दद्यात् ॥ ततः क्रमेण प्रत्येकं सोपस्करमन्नमुपनीय पृथक् पुटकस्थितसतिलजलञ्चोपनीय प्रेतपात्रादिस्थितान्नेषु मधु दद्यात् ॥ ततः पात्रालंभनाङ्गुष्ठावगाहनं विना ॥ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुखे अमृते अमृतं जुहोमि स्वाहा । इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा इति पठित्वा ॥ अपहता असुरा रक्ꣳसि वेदिषदः । इत्यन्नोपरि प्रचुरतिलान्प्रक्षिप्य कुशादीन्यादाय अद्यामुकगोत्रायामुकप्रेताय सपिण्डीकरणश्राद्धे इदमन्नं सोपस्करणं ते मया दीयते तवोपतिष्ठतामिति प्रेतान्नमुत्सृजेत् ॥ ततः पितामहान्नपात्रे व्यस्ताभ्यां हस्ताभ्यां न्युब्जाभ्यामालभ्य ॥ ॐ पृथिवी ते इत्यादि जुहोमि स्वाहेत्यन्तं इदं विष्णुरित्यादि सुरे इत्यन्तं च पठित्वा ॥ ॐ इदमन्नं । ॐ इमा आपः । ॐ इदमाज्यं । ॐ इदं हविरिति क्रमेणान्नजलघृतादिषु दक्षिणाङ्गुष्ठं निवेश्य ॥ ॐ अपहता असुरा रक्ꣳसि वेदिषद इत्यन्नोपरि तिलान्प्रक्षिप्य मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय पितामहायामुकशर्मणे वसुस्वरूपायैतत्तेऽन्नं सोपस्करणं स्वधेति पितामहायान्नमुत्सृजेत् ॥ ततः प्रपितामहान्नपात्रमालभ्य पूर्ववत् पृथिवी ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यादि कृत्वा मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय प्रपितामहायामुकशर्मणे रुद्रस्वरूपाय एतत्तेन्नं सोपस्करणं स्वधेति प्रपितामहायान्नमुत्सृजेत् ॥ ततो वृद्धप्रपितामहान्नपात्रमालभ्य पूर्ववत् पृथिवी ते इत्यादिकं सर्वं कृत्वा मोटकापीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्राय वृद्धप्रपितामहायामुकशर्मणे आदित्यस्वरूपायैतत्तेऽन्नं सोपस्करणं स्वधेति वृद्धप्रपितामहायान्नमुत्सृजेत् ॥ ततः सव्येन । मधुवाता इति ऋचं ॥ ॐ मधु मधु मधु इति च जपित्वा ॥ अन्नहीनमित्यादि च पठित्वा ॥ नमस्तुभ्यं विरूपाक्षेति च श्लोकं पठेत् ॥ ततः अपसव्येन ॥ पितामहान्नपात्रसन्निधौ आस्तृतदक्षिणाग्रकुशत्रयेण भूमिं प्रोक्ष्य मोटकं चादाय ॥ असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ॥ उच्छिष्टभागधेयानां दर्भेषु विकिरासनम्-इति आसनं दद्यात् ॥ सतिलघृतमन्नमादाय जलेनाऽऽप्लाव्य मोटकं चादाय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निदग्धाश्च ये जीवा ये प्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यंतु तृप्ता-यान्तु परांगतिमित्यास्तृतकुशोपरि तदन्नं विकिरेत् ॥ ततः सव्यंकृत्वाऽऽचम्य हरिं स्मृत्वा । अपसव्यं कृत्वा ॥ ततः प्रेतपिण्डदानार्थमेकां पितामहादिक-पिण्डदानार्थमपरां हस्तमितां चतुरङ्गुलोच्छ्रितां सैकतादिकां दक्षिणप्लवां पिण्डिकां निर्माय प्रेतपिण्डिकायां रेखाकरणोल्मुकभ्रमणं विनैव छिन्नमूलकुशा-नास्तीर्य्य अपरपिण्डिकामध्ये वामेन पाणिना दर्भपिंजुली गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूलेन सव्योपगृहीतदक्षिणपाणिना ॥ ॐ अपहता असुरा रक्षा-ꣳसि वेदिषद इति मंत्रेण दक्षिणाग्रां प्रादेशप्रमाणां रेखां सकृदुल्लिख्य दर्भपिञ्जुलि मुत्तरस्यां क्षिपेत् ॥ ततो रेखोपरि ॐ ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ॥ परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मा-दिति मन्त्रेणाङ्गारं भ्रामयित्वा दक्षिणतः क्षिपेत् ॥ ततो रेखायां छिन्नमूल-कुशानास्तृणुयात् ॥ ततः सव्यंकृत्वाऽऽचम्याऽपसव्यं कृत्वा पुटकद्वये गंध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्पतिलजलानि कृत्वा ॥ एकं पुटकं वामहस्ते कृत्वा कुशादिकमादाय अद्यामुकगोत्रामुकप्रेतसपिण्डीकरणश्राद्धे पिण्डस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठतामिति पूर्वपिण्डिकायां छिन्नमूलकुशोपरि अवनेजनं दद्यात् ॥ ततोऽपरपुटकं वामहस्ते कृत्वा मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे पिण्डस्थाने अमुकगोत्रपितामहामुकशर्मन्वसुस्वरूपऽत्रावनेनिक्ष्व तेस्वधेति द्वितीयपिण्डिकायाआस्तृतकुशमूलसन्निधाने पितामहायावनेजनं दद्यात् ॥ पुनर्मोटकादीन्यादाय ॥ ॐ अद्य मुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे पिण्डस्थाने अमुकगोत्र प्रपितामहामुकशर्मन् रुद्रस्वरूपात्रावनेनिक्ष्वतेस्वधेति आस्तृतकुशमध्ये प्रपितामहायावनेजनं दद्यात् ॥ पुनर्मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे पिण्डस्थाने अमुकगोत्रवृद्धप्रपितामहामुकशर्मन्नादित्यस्वरूपात्रावनेनिक्ष्व तेस्वधेति आस्तृतकुशाग्रे वृद्धप्रपितामहा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याऽवनेजनं दद्यात् ॥ ततः कपित्थप्रमाणान् चतुरः पिण्डान्निर्माय प्रथमपिण्डं कुशतिलसहितमादाय ॥ अद्यामुकगोत्रामुकप्रेतसपिण्डीकरणश्राद्धे एष पिण्डस्ते मया दीयते तवोपतिष्ठतामिति पूर्वपिण्डिकायां कुशोपरि प्रेतपिण्डं दद्यात् ॥ ततो पश्चिमपिण्डिकायां मोटकादीन्यादाय पिण्डं चादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रपितामहामुकशर्मन्वसुस्वरूपैष ते पिण्डः स्वधेति प्रथमावनेजनस्थाने पितामहाय पिण्डं दद्यात् ॥ पुनर्मोटकादिन्यादाय पिण्डं चादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रप्रपितामहामुकशर्मन् रुद्रस्वरूपैष ते पिण्डः स्वधेति द्वितीयावनेजनस्थाने प्रपितामहाय पिण्डं दद्यात् ॥ पुनर्मोटकादीन्यादाय पिण्डं चादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्र वृद्धप्रपितामहामुकशर्मन्नादित्यस्वरूपैष ते पिण्डः स्वधेति तृतीयावनेजनस्थाने वृद्धप्रपितामहाय पिण्डं दद्यात् ॥ ततः पिता-

Nepal Sanskrit University, Dolakhi Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महादिपिण्डास्तरणकुशमूलेन लेपभागभुजस्तृप्यन्त्विति करं प्रोक्ष्य सव्यंकृत्वा-ऽऽचम्य हरिं स्मरेत् ॥ ततऽपसव्यं कृत्वा दक्षिणाभिमुखो मन्त्रपाठं विना प्रेतं भास्वरमूर्तिं चिन्तयेत् ॥ ततः सव्येन पितामहादीनुद्दिश्य दक्षिणाभिमुखः ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति पठित्वा उत्तराभिमुखो भूत्वा श्वाशं नियम्य भास्वरमूर्तिं पितामहादिकं ध्यायन् ॥ अमी मदन्त पितरो यथाभागमावृषायिष त इति पठेत् ॥ ततः प्रेतावनेजनपात्रं वामहस्ते कृत्वा कुशादीन्यादाय अद्यामुकगोस्यामुकप्रेतस्यसपिण्डीकरणश्राद्धपिण्डे इदं प्रत्यवनेजनं ते मया दीयते तवोपतिष्ठतामिति प्रेताय प्रत्यवनेजनं दत्वा ॥ पितामहाद्यवनेजनपात्रं वामहस्ते कृत्वा मोटकादीन्यादाय ॥ ॐ अद्यामुक-गोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्रप्रपितामहामुक-शर्म्मन्वरूपेदं प्रत्यवनेजनं ते स्वधेति पितामहाय प्रत्यवनेजनं दत्वा ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तिकश्राद्धपिण्डे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमुकगोत्रप्रपितामहामुकशर्मन् रुद्रस्वरूपेदं प्रत्यवनेजनं ते स्वधेति प्रपितामहाय प्रत्यवनेजनं दत्वा ॥ ॐ अद्यामुकगोत्रास्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्रवृद्धप्रपितामहामुकशर्म्मनादित्य-स्वरूपेदं प्रत्यवनेजनं ते स्वधेति वृद्धप्रपितामहाय प्रत्यवनेजनं दद्यात् ॥ ततो नीवीं विस्रंस्य । सव्यंकृत्वाऽऽचम्य अपसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय मन्त्रापाठं विना ॥ प्रेततत्ते वास इत्युभाभ्यां हस्ताभ्यां पिण्डोपरि सूत्रं धारयेत् ॥ सूत्रमादाय ॥ ॐ नमोवःपितरो-रसायनमोवःपितरः शोषायनमोवःपितरोजीवायनमोवः पितरः स्वधायैनमोवः पितरोधोरायनमोवःपितरोमन्यवेनमोवःपितरः पितरोनमो वोगृहान्नःपितरोद-त्तसतोवः पितरोद्वेष्मौतद्वःपितरोवास इति मन्त्रं पठित्वा प्रत्येकं पिण्डोपरि सूत्रं धारयेत् ॥ ततः प्रत्येकं पिण्डान् गंधादिभिः संपूज्यकुशादिकमादाय अद्यामुकगोत्रामुकप्रेतसपिण्डीकरणनिमित्तकश्राद्धपिण्डे एतानि गंध पुष्प धूप

Nepal Sanskrit University, Balaki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीप-नैवेद्यानि ते मया दीयन्ते तवोपतिष्ठन्तामिति प्रेताय गन्धादिकमुत्सृजेत् ॥ मोटकान्यादाय ॥ ॐ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणनिमित्तकश्राद्धपिण्डे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहा अमुकामुकशर्माण वसुरुद्रादित्यस्वरूपा एतानि सूत्र गन्ध पुष्प धूप दीपैच्चवादि नैवेद्यानि युष्मभ्यं स्वधेति पितामहादिभ्यो गन्धादिकमुत्सृजेत् ॥ ततः पिण्डसमीपेतत्तत् पिण्डशेषान्नं विकिरेत् । ततः सव्येन ॥ शिवा आपः सन्तु इति जलम् ॥ सौमनस्यमस्तु इति पुष्पम् ॥ अच्चतं चारिष्टमस्तु–इति तण्डुलान् विश्वेदेवान्नपात्रोपरि च्चिपेत् ॥ ततोऽपसव्यं कृत्वा । शिवा आपः सन्तु इति जलम् ॥ सौमनस्यमस्तु इति पुष्पम् ॥ अच्चतं चारिष्टमस्तु इति तण्डुलान् ॥ प्रेतान्नपात्रोपरि क्षिपेत् कुशादिकमादाय ॥ अद्यामुकगोत्रस्यामुकप्रेतस्य सपिण्डीकरणश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्यच्चय्योदकं दत्वा ॥ सव्यं कृत्वा ॥ अघोरः प्रेतोस्तु इति दक्षिणां दिशं पश्यन्पिण्डोपरि पूर्वाग्रां जलधारां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यात् ॥ ततः सपवित्रान् कुशान्पिण्डोपरि धृत्वा मन्त्रपाठं विना पुटकादिस्थजलादिना इदमूर्ज्जं ते मया दीयते तवोपतिष्ठतामिति सपवित्रकुशोपरि दक्षिणाग्रां पयोधरां दद्यात् ॥ दक्षिणादानं विसर्जनं चान्ते सहैव भवति ॥ सुवर्णरूप्यदर्भैस्तु तस्मिन्पिण्डे ततस्त्रिधा । कृत्वा पितामहादिभ्यः पितृभ्यश्चैसमर्प्पयेत् इति ब्रह्मपुराणवचनात् ॥ सुवर्णरूप्यदर्भैः पिण्डविभागः कर्तव्यः ॥ ततः पिण्डे सूत्रादिकमपनीय ॥ अद्यामुकोत्रस्यामुकप्रेतस्य पिण्डं पितामहादिपिण्डैः सह संयोजयिष्ये इत्युक्त्वा सुवर्णं रजतकुशान् हस्तद्वयेनादाय ॥ ये समानाः इति मन्त्रद्वयं पठित्वा प्रेतपिण्डं त्रिधा विभजेत् ॥ प्रतिविभागं मन्त्रद्वयं पठेत् ॥ ततः प्रथमपिण्डभागमादाय । ये समानाः संसृजंतु त्वा पृथिवी० सन्सृजध्वं० सङ्गच्छध्वं० समानो मन्त्रः ॥ समानीव० ॥ मधुव्वाता इति मन्त्रान्पठित्वा ॥ अमुकगोत्रामुकप्रेतामुकगोत्रेण स्वपित्राऽमुकशर्म्मणावसुस्वरूपेणसंसृजस्वेतिवदन् पितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्तुलं कुर्यात् ॥ एवं द्वितीयपिण्डभागमादाय पूर्वोक्तान्सर्वान्मन्त्रात् पठित्वा अमुकगोत्रामुकप्रेतअमुकगोत्रेणस्वपितामहेनाऽमुकशर्मणारुद्रस्वरूपेण संसृज-स्वेतिवदन् प्रपितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ एवमेव तृतीयपिण्डिभागमादाय पूर्वोक्तसर्वमन्त्रान्पठित्वा अमुकगोत्रामुकप्रेता-मुकगोत्रेण स्वप्रपितामहेनामुकशर्मणा-आदित्यस्वरूपेण संसृजस्वेति वदन् वृद्धप्रपितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ ततः पिण्डमेलनानन्तरं एष वोऽनुगतः प्रेतः पितृभागमवाप्नवान् । शुभं भवतु शेषाणां जायतां चिरजीविनः इति मन्त्रं पठेत् ॥ ततः पितृपूर्वकं पितामहा-दीनुद्दिश्य गन्धपुष्पधूपदीपनैवेद्यादिभिः पिण्डत्रयमर्चयेत् मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणःसपिण्डीकरणश्राद्धपिण्डे अमुकगोत्राः पितामहप्रपितामहवृद्धप्रपितामहाः अमुकामुकामुक-शर्म्मणो वसुरुद्रादित्यस्व रूपा एतानि गन्धपुष्पधूपदीपनैवेद्यानि युष्मभ्यं स्वधेति गन्धादिकमुत्सृजेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(केचित्तु प्रेतपिण्डावयवत्रयेण संयोजिताँ स्त्रीन् पिडडानिदानींतन मृतमारभ्य पुरुषत्रयाय पार्वणवत् पुनरपि नामगोत्राद्युच्चार्य दद्यादित्याहुः)॥ ततः पितामहाद्यन्नपात्रेषु क्रमेण प्रत्येकं ॥ ॐ शिवा आपः सन्तु इति जलम् ॥ ॐ सौमनस्यमस्तु इति पुष्पम् ॥ ॐ अक्षतं चारिष्टमस्तु इति तण्डुलान् दत्वा। ततः सव्यंकृत्वा कर्म्मपात्तोदकं कुशैः प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत्। ॐ अस्मत्कुले दीर्घमायुरस्तु ॥ ॐ शान्तिरस्तु ॥ ॐ पुष्टिरस्तु ॐ वृद्धिरस्तु ॥ ॐ यद्यच्छ्रेयस्तदस्तु ॥ ॐ यत्पापं तत्प्रतिहतमस्तु इति भूमौ। ॐ द्विपदे-चतुष्पदेभ्यः शान्तिरस्तु ॥ ततोऽपसव्यं कृत्वा मोटकादिन्यादाय ॥ ॐ अद्यामुकगोत्रास्यास्मत्पितुरमुकशर्म्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रास्याऽस्मत्पितामहस्यामुकशर्म्मणो वसुस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति पितामहायाक्षय्योदकं दत्वा ॥ ॐ अद्यामुकगोत्रास्यास्मत्पितुरमुकशर्म्मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रास्यास्मत्प्रपितामहस्यामुकशर्म्मणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मणः सपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रास्यास्मत्प्रपितामहस्यामुकशर्म्मणो
CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

रुद्रस्वरूपस्य दत्तैतदन्नपानादिकमक्षय्यमस्त्विति प्रपितामहायाक्षय्योदकं दत्वा ॥ ॐ अद्यामुकगोत्रास्यास्मत्पितुरमुकशर्म्मणःसपिण्डीकरणनिमित्तकश्राद्धे अमुकगोत्रास्यवृद्धप्रपितामहस्यामुकशर्म्मणो आदित्यस्वरूपस्य दत्तैतदन्न-पानादिकमक्षय्यमस्त्विति वृद्धप्रपितामहायाक्षय्योदकं दत्वा ॥ सव्यंकृत्वा ॥ कृताञ्जलिर्दक्षिणां दिशमवलोकयन् ॐ अघोराः पितरः सन्तु इति पिता-महादि पिण्डत्रयोपरि पूर्वाग्रां जलधारां दद्यात् ॥ ततः सव्येनैव प्राङ्मुखः आशिषः प्रार्थयेत् ॐ गोत्रं नो वर्द्धताम् ॥ ॐ वर्द्धतामिति प्रतिवचनम् ॥ ॐ दातारो नोऽभिवर्द्धन्ताम् ॥ ॐ वर्द्धन्ताम् ॥ ॐ वेदाः सन्तति रेव च ॥ ॐ सन्तु ॥ ॐ श्रद्धा च नो माव्यगमत् ॥ ॐ मागात् ॐ बहु-देयं च नोऽस्तु ॥ ॐ अस्तु ॥ ॐ अन्नं च नो बहु भवेत् ॥ ॐ भवतु ॥ ॐ अतिथींश्च लभेमहि ॥ ॐ लभध्वम् ॥ ॐ याचितारश्च नः सन्तु ॥ ॐ सन्तु ॥ ॐ मायाचिष्म कञ्चन ॥ ॐ मायाचेथा ॥ ॐ एताः आशिषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्या सन्तु ॐ सन्तु ॥ श्राद्धकर्ता ब्राह्मणहस्तेनतिलकं कुर्यात् ॥ अपसव्यं कृत्वा ॥ पिण्डोपरि सपवित्राकुशानास्तीर्य्य जलादि सहितं पुटकं वामहस्ते कुत्वा ॥ ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतम् ॥ स्वाधास्थ तर्प्पयत मे पितॄन् इति सपवित्राकुशोपरि दक्षिणाग्रां पयोधारां दद्यात् ॥ ततो सव्येन नम्रीभूय पिण्डानाघ्राय अपसव्येनोत्थापयेत् ॥ पिण्डाधारकुशानुल्मुकांश्च वह्नौ क्षिपेत् । सव्येन पिण्डिकायां शङ्खं चक्रं च संलिख्य ॥ ॐ शङ्खाय नमः ॥ ॐ चक्राय नमः इति गन्धादिभिः शंखचक्रपूजां विधाय ॥ अपसव्यं कृत्वा । तूष्णीमेव पिण्डान् पिण्डिकोपरि निधाय पूजयेदेभिर्मन्त्रैः ॥ सव्येन ॥ ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ॥ वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमो नमः ॥ हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ॥ माससम्वत्सरेभ्यश्च दिवसेभ्यो नमो नमः इति ॥ ततः सव्येन विश्वेदेवार्घपात्रं सञ्चाल्य ॥ अपसव्येन पितामहाद्यर्घपात्राण्युत्तानीकृत्य ॥

Nepal Sanskrit University, Ramshah Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

सव्येन दक्षिणां दद्यात् ॥ ततः कुशयवजलदक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्म्मणः सपिण्डीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्म्मवसुरुद्रादित्यस्वरूपश्राद्धसम्बन्धिनां कालकामविश्वेषां देवानां कृतैतच्छ्राद्धप्रतिष्ठार्थं हिरण्यमग्निदैवनं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति विश्वेदेवश्राद्धदक्षिणां दत्वा (सर्व कर्मापसव्येन दक्षिणादानवर्जितमिति जमदग्निवचनात् पित्रादि दक्षिणावाक्यम् (सव्येनैव कुशतिलजलदक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः कृतैतत् सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति पितृश्राद्धे दक्षिणां दत्वा ॥ पुनः कुशतिलदक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मणः सपिण्डीकरणनिमित्तकश्राद्धे कृतैतदमुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहवसुरुद्रादित्यस्वरूपामुकामुकामुकशर्म्माणः श्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दक्षिणां दातुमहमुत्सृजे इति पितामहादिश्राद्ध दक्षिणां दद्यात् ॥ ततः सव्येनैव ॥ कालकामविश्वेदेवाः प्रीयन्तामिति विश्वे-देवविसर्ज्जनं कृत्वा ॥ अपसव्येन ॥ स्वस्तीति पितृविसर्ज्जनं कृत्वा ॥ वाजे वाजे वत ववाजिनोनो धनेषु विप्राऽअमृता ऋतज्ञाः ॥ अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैरिति पितामहादीन् विसर्जयेत् ॥ ततः सव्येन । ॐ देवताभ्य इति त्रिः पठेत् ॥ अपसव्येन रज्ज्वोघ्नदीपाच्छादनं विधाय ॥ सव्येन । हस्तौ पादौ प्रक्षाल्याऽऽचम्य विष्णुस्मरणं कुर्यात् ॥ ततः ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु च ॥ स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिरिति पठित्वा तत्फलकामो विष्णुस्मरणं कृत्वा ॥ श्राद्धीयव-स्तूनि ब्राह्मणाय दद्यात् ॥ पिण्डाञ्जले प्रतिपादयेत् ॥ सहगमने तु पित्रैकोद्दिष्ट-वन्मात्रेकोद्दिष्टं सहैव विधाय पित्रर्घपात्रपितामहार्घपात्रे मेलयित्वा ॥ ॐ अ-द्यामुकगोत्राया-मातुरमुकप्रेताया - अर्घपात्रोदकं-अमुकगोत्रस्यस्वभर्तुरर्घपात्रोद-

Nepal Sanskrit University, Beldangi Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

केन संयोजयिष्ये इत्युक्त्वा पात्रं गृहीत्वा ॥ पूर्वोक्तान्मंत्रान् पठित्वा पित्रर्घपात्रस्थतृतीयभागजलं गंधयुक्तंपितामहार्घपात्रस्थजले मेलयित्वा अमुकगोत्रे मातरमुकप्रेते अमुकगोत्रेण स्वभर्त्रासह सायुज्यं गच्छेति वदेत् ॥ एवं पितृपिण्डं संयोजनानन्तरम् ॥ ॐ अद्यामुकगोत्रायाः मातुरमुकप्रेतायाः पिण्डं स्वभर्तृपिण्डेन संयोजयिष्ये इत्युक्त्वा मातृपिण्डमादाय ॥ सर्वत्र मन्त्रापाठान्ते ॥ ॐ अमुकगोत्रे मातुरमुकप्रेते अमुकगोत्रेण स्वभर्त्रामुकशर्मणा संसृजस्वेति वदन् ॥ पितृपिण्डप्रथमभागयुक्ते पितामहपिण्डे संयोज्य दधिमधुभ्यां मिश्रीकृत्य वर्तुलं कुर्यात् ॥ मातृश्राद्धदक्षिणावाक्यं पृथक् कुर्य्यात् ॥ तत्रैव ॥ सव्येन कुशतिलदक्षिणाद्रव्याण्यादाय ॥ ॐ अद्यामुकगोत्रायाः अस्मत्मातुरमुकदेव्याः कृतैतत् सपिण्डीकरणश्राद्धप्रतिष्ठार्थमिदं रजतं चन्द्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति विशेषः ॥ सहगमनाभावे मातृसपिण्डीकरणे पितामह्यादि पिण्डत्राये मातृपिण्डं संयोजयेत् ॥ मृतमातृको मात्रादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डत्राये पत्न्यापिण्डं संयोजयेत् ॥ अमृतमातृकस्तु पितामह्यादि पिण्डत्राये पत्न्याः पिण्डं संयोजयेदिति सपिण्डीकरणम् ॥

अथ सपिण्डोत्तरपाथेयश्राद्धम् । तच्च सपिण्डीकरणानन्तरं द्वादशेऽह्नि वा पुनः पाथेयश्राद्धं कुर्यात् । तच्च पार्वणमेकोद्दिष्टेन वा यथाऽऽचारेण सिद्धान्नेनाऽऽमान्नेन वा कुर्यात् ॥ तत्रा क्रमः ॥ कर्त्ता स्नातः शुचिराचान्तः पूर्वोपकल्पितप्रज्वालितदीपं स्थापयित्वा गौरसर्षपतिलादिरक्षोघ्नश्राद्धदेशमागत्य पूर्वाभिमुखं उपविश्य ॐ यद्देवा देवहेडनमित्यादि मन्त्रात्रायेण कर्मपात्रं कर्त्तव्यम् । ॐ पवित्रेस्थोइति पवित्राम् ॥ ॐ शन्नोदेवीति जलम् ॥ ॐ तिलोऽसीति तिलान् ॥ ॐ गंधद्वारामिति चन्दनम् ॥ ॐ अक्षन्नमीमदन्तेत्यक्षताः ॥ ॐ श्रीश्चतेति पुष्पाणि ॥ ॐ यवोसीति यवान् कर्मपात्रे क्षिप्त्वा ॥ कुशजलेन ॐ अपवित्राः पवित्रोवेत्यादि पठित्वा पुण्डरीकाक्षः पुनात्वित्युच्चार्य श्राद्धदेशे द्रव्याण्यात्मानं च सिञ्चेत् ॥ ततःकुशादिकमादाय ॐ अग्येहेत्यादि

Nepal Sanskrit University. Damodar Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देशकालौ स्मृत्वा अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः प्रेतलोकात् पितृलोकगमने सुखसिद्ध्यर्थं पाथेयश्राद्धंसांवत्सरिकैकोद्दिष्टश्राद्धविधिनाऽहं करिष्ये इति संकल्पं कुर्यात् ॥ अत्र वाक्ये पाथेयपदप्रक्षेप इति विशेषः ततो देवताभ्यः इति त्रिः पठेत् ॥ ततोऽपसव्यं कृत्वा दक्षिणाभिमुखः पातितवामजानुर्मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः पाथेयश्राद्धे इदमासनं ते स्वधा ॥ ततः पुटके प्रादेशमात्रं पवित्रं ॐ पवित्रेस्थो इति मन्त्रेण दक्षिणाग्रं धृत्वा ॥ ॐ शन्नो देवीति जलम् ॥ ॐ तिलोसीति तिलान् ॥ ॐ गन्धद्वारामिति गन्धम् ॥ ॐ श्रीश्चतेति पुष्पाणि तत्तन्मन्त्रेण क्षिपेत् ॥ ततस्तदर्घपात्रं वामहस्ते कृत्वा पुष्पसहितंपवित्रं अर्घपात्रोपरि ॐ नमो नारायणायेति मन्त्रेणोत्तराग्रं धृत्वा दक्षिणहस्तेन तन्मुखमाच्छाद्य ॥ ॐ या दिव्या आपः इत्यादिनाऽर्घपात्रस्थ जलमभिमन्त्र्य मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रामुकशर्मन् पाथेयश्राद्धे एष हस्तार्घस्ते स्वधेति पवित्रोपरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्घजलं ददद्युत्सृजेत् ॥ ततः पवित्रसहितमर्घपात्रमासनवामपार्श्वे पित्रे स्थानमसीति न्युब्जं कुर्यात् तदुपरि कुशत्रयं दद्यात् ॥ ततो गन्धादिना संपूज्य मोटकादोन्यादाय ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेयश्राद्धे एतानि गन्धपुष्पाक्षतधूपदीपपूगोफलद्रव्यवासांसि ते स्वधेति गन्धादिकमुत्सृजेत् ॥ तत आसनसहितस्यान्नपात्रस्य चतुर्दिक्षु चतुरस्रं मण्डलं विधाय ॥ श्राद्धीयान्नाग्रभागतिलघृतमधुजलयुतमादाय मोटकादोन्यादाय ॥ इदमामान्नं सजलमेतद् भूस्वामिपितृभ्यो नमः इत्युत्सृजेत् ॥ ततो व्यंजनसहिततिलघृतमधुजलयुतमन्नमुपनीय मधुनाऽभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य ॥ पृथ्वी ते इत्यादि जुहोमीत्यन्तरम् ॥ इदं विष्णुरित्यादि सुरेत्यन्तं च पठित्वा ॥ ॐ अपहता असुरेत्यादिना तिलानन्नोपरि क्षिप्त्वा ॥ ॐ इदमन्नम् ॥ ॐ इमा आपः ॥ ॐ इदमाज्यम् ॥ ॐ इदं हविरिति पुनरन्ने एतान्युपकरणानीति क्रमेणान्नजलघृतेषु विप्रदक्षिणाङ्गुष्ठं निवेश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वामहस्ताङ्गुलिभिः क्रमेणान्नमपश्चस्पृष्ट्वा ॥ मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे इदमन्नं सजलं सोपस्करणं ते स्वधेत्युत्सृजेत् ॥ ततः सव्यंकृत्वा । मधु व्वातेत्यादि ऋचं पठेत् ॥ ॐ मधु मधु मधु इति अन्नहीनमिति च पठेत् ॥ ततोऽन्नपात्रसमीपे दक्षिणस्यां भूमौ कुशानास्तीर्य विकिरासनं दद्यात् ॥ मोटकादीन्यादाय ॥ असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् ॥ उच्छिष्टभागधेयानां दर्भेषु विकिरासनम् ॥ ततः सतिलघृतमधुजलयुतमन्नमादाय जलेनाऽऽप्लाव्य मोटकादीन्यादाय ॥ अग्निदग्धाश्च ये जीवा येप्यदग्धा कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् इत्युत्सृजेत् ॥ कुशान्परित्यज्य सव्येन हस्तौ पादौ प्राक्षाल्याऽऽचम्य विष्णुं स्मरेत् ॥ मधुवातेति ऋचं पठेत् गायत्रीं स्मरेत् ॥ ततोऽऽपसव्येन अन्नपात्रसमीपे पिण्डदानार्थं मृत्पिण्डिकां विधाय तदुपरि दर्भपिञ्जुलीं गृहीत्वा ॥ ॐ अपहता असुरा रक्षा इत्यादि मन्त्रेण दक्षिणाग्रां रेखां कृत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तरस्यां क्षिपेत् ॥ ततो रेखोपरि ये रूपाणीति मन्त्रेणाङ्गारं भ्रामयित्वा दक्षिणस्यां क्षिपेत् ॥ ततो वेदिकायां छिन्नमूलकुशानास्तीर्य ॥ सव्येन । ॐ देवताभ्यः इति त्रिः पठेत् ॥ अपसव्यं कृत्वा मोटकादीन्यादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेयश्राद्धे पिण्डस्थाने इदमवनेजनं ते स्वधेति कुशोपरि आसनं दद्यात् ॥ ततस्तिलघृतमधुयुक्तेनान्नेन पिण्डं निर्माय जलतिलमोटकसहितपिण्डमादाय ॥ ॐ अद्यामुकगोत्राऽस्मत्पितरमुकशर्मन् माथेयश्राद्धे एष पिण्डोऽमृतस्वरूपो अक्षय्यतृप्तिहेतोस्ते स्वधेति अवनेजनोपरि पिण्डं दद्यात् ॥ आस्तृतकुशमूलेनलेपभागभुजस्तृप्यन्तु इति करं प्रोक्ष्य सव्यं कृत्वाऽऽचम्य गंधपुष्पादीन्यादाय पितरमुद्दिश्य । ॐ अत्र पितरो मादयध्वं यथाभागमावृषायद्ध्वमित्युत्तराभिमुखो भूत्वा श्वासं नियम्य भास्वरमूर्तिं पितरं ध्यायन् अपसव्यंकृत्वा तेनैव परावर्त्तमानः ॥ ॐ अमीमदन्त पितर इति मन्त्रेण पुष्पादीनि पिण्डे निक्षिपेत् ॥ ततो मोटकादीन्यादाय ॐ अद्यामुक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

गोत्राऽस्मत्पितरमुकशर्मन् पाथेय श्राद्धपिण्डे इदं प्रत्यवनेजनं ते स्वधेति प्रत्यवनेजनं पिण्डोपरि दद्यात् ॥ ततो नीवीं विस्रंस्य ॥ सव्यंकृत्वाऽऽचम्याऽपसव्यंकृत्वा ॥ वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय ॥ ॐ नमो वः पितर इति मन्त्रेण पिण्डोपरि सूत्रं दद्यात् ॥ गंधपुष्पादिभिः संपूज्य धूपदीपौ चकारयेत् ॥ मोटकादान्यादाय ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् पाथेयश्राद्धपिण्डे एतानि सूत्रगंधपुष्पाक्षतधूपदीपैक्षवादि नैवेद्यानि ते स्वधेति गंधादिकमुत्सृजेत् ॥ ततः ॐ शिवा आपः सन्तु इति जलम् ॥ ॐ सौमनस्यमस्तु इति पुष्पम् ॥ ॐ अक्षतञ्चारिष्टमस्तु इति तण्डुलान् अन्नपात्रोपरि क्षिपेत् ॥ सव्यं कृत्वा कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिंचेत् ॥ ॐ अस्मत्कुले दीर्घमायुरस्तु ॥ ॐ शान्तिरस्तु ॥ ॐ पुष्टिरस्तु ॥ ॐ वृद्धिरस्तु ॥ ॐ यच्छ्रेयस्तदस्तु ॥ ॐ यत्पापं तत्प्रतिहतमस्तु इति भूमौ ॥ ॐ द्विपदेचतुष्पदेभ्यः शान्तिरस्तु इति अभिषिञ्चेत् ॥ ततः अपसव्येन मोट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः पाथेयश्राद्धे दत्तैतदन्नपानादिकमक्षय्यमस्तु ॥ इति अक्षय्योदकं दत्वा ॥ सव्यं कृत्वा दक्षिणां दिशं पश्यन् ॐ अघोरः पिताऽस्तु इति पूर्वाग्रां जलधारां दद्यात् ॥ ततः सव्येनैव प्राङ्मुखोभूत्वाऽऽशिषः प्रार्थयेत् ॥ गोत्रन्नो वर्द्धताम् ॥ वर्द्धतामिति प्रतिवचनम् ॥ ॐ दातारो नोभिवर्द्धन्ताम् ॥ ॐ वर्द्धन्तामिति प्रतिवचनम् ॥ ॐ वेदाः सन्तु ॥ ॐ सन्त्विति प्रतिवचनम् ॥ ॐ संततिरस्तु ॥ ॐ संत्विति प्रतिवचनम् ॥ श्रद्धा च नो मा व्यगमत् ॥ ॐ मागात् इति प्रतिवचनम् ॥ ॐ बहुदेयं च नोऽस्तु ॥ ॐ अस्त्विति प्रतिवचनम् ॥ ॐ अन्नं च नो बहु भवेत् ॥ ॐ भवतु ॥ ॐ अतिथींश्च लभेमहि ॥ ॐ लभध्वम् ॥ याचितारश्च नः सन्तु ॥ ॐ सन्त्विति प्रतिवचनम् ॥ ॐ मा याचिष्म कञ्चन ॥ ॐ मायाचेयेति प्रतिवचनम् ॥ ॐ एताः सत्याशिषः सन्तु ॥ ॐ संत्विति प्रतिवचनम् ॥ ततः श्राद्धकर्ता ब्राह्मणहस्तेन तिलकं

Nepal Sanskrit University, Research Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

कुर्य्यात् ॥ ततोऽपसव्यं कृत्वा पिण्डोपरि सपवित्रान्कुशानास्तीर्य जलादिसहितं पुटकं वामहस्ते कृत्वा ॐ ऊर्ज्जम्वहन्तोत्यादि मन्त्रण दक्षिणाग्रां पयोधारां पिण्डापरि दद्यात् ॥ सव्येन नम्रीभूय पिण्डमाघ्राय अपसव्येनोत्थापयेत् पिण्डाधारकुशानुल्मुकं च वह्नौ क्षिपेत् ॥ ततः सव्येन पिण्डिकायां शङ्खं चक्रं च लिखेत् ॥ ॐ शङ्खाय नमः ॥ ॐ चक्राय नमः ॥ ॐ शङ्खचक्राभ्यांनमः इति यवैः शङ्खचक्रपूजां विधाय। अपसव्यं कृत्वा तूष्णीमेव पिण्डं पिण्डकोपरि निधाय ॥ सव्येन ॐ वसन्तायेत्यादिभिर्मन्त्रैः ॥ पूजयेत् ॥ ततो अपसव्येनार्घ पात्रमुत्तानीकृत्य ॥ सव्येन दक्षिणाद्रव्यं कुशादिकमादाय ॥ अद्यामुकगोत्र स्यास्मत्पितुरमुकशर्मणः कृतैतत्पाथेयश्राद्ध प्रतिष्ठार्थमिदं रजतचन्द्रदैवतं तन्निष्क्रयद्रव्यं वा यथानामदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् ॥ ततोऽपसव्येन ॐ वाजे वाजेति पितृविसर्जनम् ॥ ततः सव्येन ॐ देवताभ्यः इति त्रिः पठेत् ॥ अपसव्येन दीपाच्छादनं विधाय। सव्येन हस्तौ पादौ प्रक्षाल्याऽऽचम्य प्रमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दादिति पठित्वा विष्णुं स्मरेत् ॥ श्राद्धीयवस्तुनि ब्राह्मणाय प्रतिपादयेत् ॥ इतिपाथेयश्राद्धं सम्पूर्णम् ॥

अथ पञ्चकमरणविधिः गरुड़पुराणे ॥ आदौ कृत्वा धनिष्ठार्द्धमेतन्नक्षत्र-पञ्चकम् ॥ रेवत्यन्तं सदा दुष्यं न शुभं सर्वदा भवेत् ॥ दाहस्तत्र न कर्त्तव्यो विषादः सर्वजन्तुषु । न दीयते जलं तत्र ह्यशुभं सर्वदा भवेत् ॥ पञ्चकानन्तरं कार्यं कर्त्तव्यं सर्वमन्यथा ॥ पुत्राणां गोत्रिणां तस्य सन्तापो ह्युपजायते । गृहे हानिर्भवेत् तस्य ऋक्षेष्वेषु मृतस्तु यः ॥ ब्रह्मपुराणे ॥ कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते ॥ न तस्योर्ध्वगतिर्दृष्टा सन्ततौ न शुभं भवेत् ॥ न तस्य दाहः कर्त्तव्यो विनाशः स्वेषु जन्तुषु ॥ पञ्चकानन्तरं सर्वं कार्यं दाहादिकं खलु ॥ अथवा तद्दिने कार्यो दाहस्तु विधिपूर्वकः ॥ धनिष्ठापञ्चके जीवो मृतो यदि कथंचन ॥ त्रिपुष्करे याम्यभे च कुलजान्मारयेद् ध्रुवम् ॥ तत्रानिष्टविना-शार्थं विधानं समुदीर्यते ॥ दाहदेशं शवं नीत्वा स्नापयेच्च प्रयत्नतः ॥ दर्भाणां प्रतिमाः कार्या पञ्चोर्णासूत्रवेष्टिताः ॥ यवपिष्टेनानुलिप्तास्ताभिः सह शवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

दहेत् ॥ प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ॥ प्रेतहर्ता पञ्चमस्तु नामान्येतानि च क्रमात् ॥ सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ॥ कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद् द्विजन्मने ॥ ब्रह्मविष्णुमहेशेन्द्रवरुणप्रीतय ततः ॥ माषमुद्गयवव्रीहिप्रीयंग्वादि प्रयच्छति ॥ स्वर्णदानं रुद्रजाप्यं लक्षहोमो द्विजार्चनम् ॥ गोभूदानं शडंशेन कुर्याद्दोषोपशान्तये ॥ इति पंचकमरणविधिः ॥ अथ पंचकमरणप्रयोगः ॥ कर्त्ता सव्येन पूर्वाभिमुखः कुशतिलजलान्यादायः ॥ अद्येहेत्यादि अमुकगोत्रस्यामुकप्रेतस्य धनिष्ठादिपंचकमरणविधि करिष्ये इति संकल्प्य ॥ गन्धमाल्याद्यैः पंचापि प्रतिमा अलंकृत्य ऊर्णसूत्रेणाऽऽवेष्ट्य यवपिष्टेनाऽनुलिप्य दाहसमय प्रेतोपरि न्यसेत् ॥ प्रेतवाह प्रतिमां शिरसि ॥ प्रेतसखप्रतिमां नेत्रयोः प्रेतप्रतिमां बाहुकुक्षौ ॥ प्रेतभूमिपप्रतिमां नाभौ ॥ प्रेतहर्तुप्रतिमां पादयोः ॥ ताभ्योपञ्चभ्यो नाममन्त्रैर्घृताहुतो हुत्वोदकधारां दत्वा ॥ यमाय सोमं मधुमत्तयेषां ते नो गावः स्वदन्तु हव्या ॥ दूतं वा देवः स्वदममुमेषा ते नो रासत मुरुगाय मद्या यूयं पातःस्वस्तिभिः सदा नः ॥ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बन्धनान्मृत्योर्मृक्षीयमामृतात् इति मंत्राभ्यां तासु प्रतिमासु प्रत्येकमेकैका घृताहुतार्जुहुयात् ॥ पञ्चोदकधाराशः दत्वा शवंदहेत् ॥ इति पञ्चकमरणदाहविधिः ॥

अथ मासिकश्राद्धविधिः आद्यमासिकश्राद्धे सान्नोदककुम्भोत्सर्गान्नसंकल्प विधि ॥ गोमयोपलिप्ते भूमौ प्राङ्मुखंउपविश्य दीपं प्रज्वाल्य कर्त्ता शुचिरचान्तः ब्राह्मणाय नमः इति ब्राह्मणं त्रिः संपूज्य दक्षिणाभिमुखः अपसव्येन ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः अद्यः कर्त्तव्यामुकमासिकश्राद्धे अनेन ताम्बूल गंध पुष्पाक्षतेन त्वं मया निमन्त्रितः ॥ ॐ निमन्त्रितोऽस्मीति प्रतिवचनम् ॥ अक्रोधन इति पठेत् ॥ ॐ नमोस्त्वनन्तायेति मन्त्रेण ब्राह्मणचारणौ प्रक्षालयेत् ॥ ततः पाद्यपात्रं वामहस्ते कृत्वा मोटकादिकमादाय ॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन्नेष पादार्घस्ते स्वधा ॥ सव्येनाऽऽचम्य गृहं प्रवेशयेत् अपसव्येन ॥ ॐ आगता यूयं ॐ सुस्वागतावयं ॥ ॐ इदमासनमास्यताम् ॥ ॐ आस्यते प्रतिवचनम् ॥ ब्राम्हणमुदङ्मुखमुपवेशयेत् ॥ ॐ कर्मपात्रमहं करिष्ये ॥ ॐ कुरुष्वेति प्रतिवचनम् ॥ ॐ यद्देवादेवहेड-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDP

नमिति कण्डिकात्रयेण कर्मपात्रम् ॥ ॐ शन्नो देवोति जलम् ॥ ॐ पवित्रेस्थेति कुशान् ॥ ॐ गंधद्वारामिति गन्धम् ॥ ॐ अन्नन्नमोमदन्तेत्यक्षताः ॥ ॐ तिलासोति तिलान् क्षिपेत् ॥ सव्येन कुशत्रयसहितं कर्मपात्रोदकमादाय ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ पुण्डरीकाक्षः पुनातु इत्युक्त्वा श्राद्धदेशं द्रव्याण्यात्मान च सिंचेत् ॥ ततः कुशादिकमादाय ॐ अद्येत्यादि पूर्वसंकल्पसिद्धिरस्तु अमुक मासिक सान्नोदककुम्भोपस्थितिस्वर्गताश्वमेध-यज्ञ जन्यफलसमफलप्राप्तिका मोऽमुकगोत्रस्यास्मत्पितुरमुकशर्मणः सान्नोदककुम्भोत्सर्गा-न्नसंकल्पादिकामुक मासिक श्राद्धमेभिद्रव्यैरहं करिष्ये इति-प्रतिज्ञां कृत्वा ॥ ॐ देवताभ्यः इति त्रिर्जपेत् ॥ ततोऽपसव्यं कृत्वा ॥ दक्षिणाभिमुखो भूत्वा सान्नोदक-कुम्भमग्रतः कृत्वा कुशादीन्यादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मण अमुक-मासिकश्राद्धइदमासनं तुभ्यं स्वधेति कुम्भासनसमीपे उत्सृजेत् ॥ ततो गंध पुष्पाक्षत धूप दीपवस्त्रादिनैवेद्यद्रव्यवस्त्रादिभिः ब्राह्मणंकुम्भं च संपूज्य मोटकादिकमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MoE

दाय ॥ ॐ अद्यामुकगोत्रास्मत्पितरमुकशर्मन् एतानि गंधपुष्पाक्षतधूपदीपैश्चावा
द्यैर्नैवेद्यताम्बूलवस्त्रद्रव्यपूगीफलयज्ञोपवीतादीनि तुभ्यं स्वधेति कुम्भसमीपे
उत्सृजेत् ॥ गंध-द्वारामिति मंत्रेण ब्राह्मणाय तिलकं कुर्यात् ॥ ततो मोटकादि
कमादाय सान्नोदककुंभं स्पृशेत् ॐ अद्यामुकगोत्रायास्मत्पित्रेऽमुकशर्मणे अयं
सान्नोदककुंभस्तुभ्यं स्वधेति ब्राह्मणकरे कुम्भमुत्सृजेत् ॥ अथ भूस्वामी तिल
घृतमधुजलयुतमन्नं मोटकादिसहितमादाय ॥ ॐ इदमामान्नं सजलमेतद्भूस्वा
मिपितृभ्यो नमः ॥ अथान्नसंकल्पः ॥ सोपस्करंतिलजलयुतमन्नमुपनीय मधु-
नाभिघार्य अधोमुखाभ्यां व्यस्ताभ्यां पाणिभ्यामन्नपात्रमालभ्य ॐ पृथिवी ते
पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ॥ ॐ इदं
विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पाछंसुरे स्वाहा इतिपठित्वा ॥
ॐ इदमन्नं ॥ ॐ इमा आपः ॥ ॐ इदमाज्यं ॥ ॐ इदं हविः ॥ ॐ एतान्यु-
करणानि इत्यन्नजलादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य ॥ ॐ अपहता असुरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अद्यामुकगोत्रायास्मत्पित्रे ऽमुकशर्मणे इदमन्नं सजलं सोपस्करंपरिविष्टंपरिवे-

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

पात्रं द्यौरपधानं ब्राह्मणस्य मुख अमृत अमृत जुहोमि स्वाहा ॥ ॐ इ-
विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पाꣳसुरे स्वाहा इतिपठित्वा ॥
ॐ इदमन्नं ॥ ॐ इमा आपः ॥ ॐ इदमाज्यं ॥ ॐ इदं हविः ॥ ॐ एतान्यु-
करणानि इत्यन्नजलादिषु विप्रदक्षिणाङ्गुष्ठं निवेश्य ॥ ॐ अपहता असुरा-

अद्यामुकगोत्रायास्मत्पित्रे ऽमुकशर्मणे इदमन्नं सजलं सोपस्करंपरिविष्टंपरिवे-
ष्यमाणमक्षय्यतृप्तिहेतोस्तेस्वधेति अन्नमुत्सृजेत् ॥ ॐ अन्नसंकल्पसिद्धिरस्तु
भवान्प्राशयतु इत्यापोशनं दत्वा । सव्येनाञ्जलिं बध्वा सम्पाव्याधा इति पठेत् ॥
ॐ मधु० वातेति ऋचं ॥ ॐ मधु ३ अन्नहीनमित्यादि च पठेत् ॥ ततोऽपस
व्येन ब्राह्मणकरे ॥ ॐ शिवा आपः सन्तु इति जलम् ॐ सौमनस्यमस्तु इति
पुष्पम् ॥ अक्षत चारिष्टमस्तु इति तण्डुलान् दद्यात् । सव्यं कृत्वा पूर्वाभिमु-
खेन पठेत् ॐ अपां मध्ये स्थिताः देवाः सर्वमप्सु प्रतिष्ठितम् ॥ ब्राह्मणास्य
करे न्यस्ता शिवा आपो भवन्तु मे ॥ १ ॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति
पुष्करे ॥ लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं ददातु मे ॥ अक्षतञ्चास्तु मे पुण्यं
शान्तिः पुष्टिर्धृतिस्तथा ॥ यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ ततः
कर्मपात्रोदकं कुशैर्गृहीत्वा प्रतिमन्त्रं स्वशिरस्यभिषिञ्चेत् ॥ ॐ अस्मत्कुले
दीर्घमायुरस्तु ॥ ॐ शान्तिरस्तु !! ॐ पुष्टिरस्तु ॐ वृद्धिरस्तु ॥ ॐ
यच्छ्रेयस्तदस्तु ॐ यत्पापं तत्प्रतिहतमस्तु इति भूँभौ ॥ ॐ द्विपदेचतुष्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MHDF

देभ्यः शान्तिर्भवतु ॥ यं कामं कामयते सोऽस्मै कामः समृद्ध्यतामिति ब्राह्मण हस्तेन तिलकं कृत्वा ॥ ततो दक्षिणां दद्यात् तिलकुशयवजलद्रव्यमादाय ॥ ॐ अद्यामुकगोत्रस्यास्मत्पितुरमुकशर्मणः कृतैतत्सान्नोदककुम्भोत्सर्गान्नरक कल्पादिकरूपममुकमासिकश्राद्धप्रतिष्ठासाङ्गतासिध्यर्थमिमां दक्षिणां रज चन्द्रदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं सम्प्रद ॥ ॐ स्वस्तीति प्रतिवचनम् ॥ ततोऽपसव्येन दोपाच्छादनं विधाय ॥ सव्य न हस्तौ पादौ प्रक्षाल्याऽऽचम्य इति पठेत् ॥ ॐ यत्कृतं तत्सुकृतमस्तु य कृतं तद्विष्णोः प्रसादाद् ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु ॥ ॐ अस्तु परिपू म् ॥ ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताऽध्वरेषु च ॥ स्मरणादेव तद्विष्णो. सम्पूर्णं स्यादिति श्रुतिः ॥ ततो विष्णुस्मरणम् ॥ ब्राह्मणविसर्जनम् ॥ स्वस्ती त्युक्त्वा ॥ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मनावा प्रकृतिस्वभावात् ॥ करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि । ततो मन्त्राशिषं गृहीत्वा ब्राह्मणान्भोजयेत् स्वयमपिभञ्जीत ॥ इति संक्षेपतोमासिकश्राद्धविधिः समाप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Foundation

...जयत् स्वयमपि भुञ्जीत ॥ इति संक्षेपतो मासिकश्राद्धविधिः समाप्तः ।

294.5446
BAL

12246

महेन्द्र संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ
पुस्तकालय

Class No 294.5446 Acc. No. 12246
Author ...बालकृष्णाचार्य... Book No ...BAL...
Title ...अन्त्यपद्धति...

Due on	Borrower's Name	Returned on

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

[illegible]

CC-0. In Public Domain. Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

❀ इति ❀

शुक्लयजुर्वेदाचार्येण सुपरिष्कृता परिवर्द्धिता च दशदानादि
वार्षिकश्राद्धपर्यन्ता और्द्धदैहिकक्रियायाः

अन्त्यपद्धतिः समाप्ता

प्रकाशकः तथा प्राप्तिस्थानम्
पं० बालकृष्णाचार्य. यशोदापुस्तकालय
ाराणसी-१
०) लि० गोलघर, वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu